Accn. No. 5709

श्रीरस्तु ।

वचस्सुधातत्त्वम् ।

5709
5709
5709

श्रीमन्महीमण्डलमण्डनायमानमैसूरराजधानीमध्यविद्यो-
तमानश्रीमत्कर्णाटकसिंहासनाधीश्वरस्यश्रीमद्राजाधि-
जेत्याद्यनन्यसामान्यविरुदावलीविराजमानश्रीमत्
कृष्णराजमहाराजाधिराजस्य महास्थान्यां
महाविदुषा श्रीमतां "पण्डितरत्न"
"तर्कतीर्थ" दि बिरुदेन,

कस्तूरीरङ्गाचार्यवर्येणविरचितम् ।

सद्विद्यासमभिवर्धनप्राचीनार्वाचीनप्रबन्धप्रचारनिर्वहणादिभिरसह-
येन 'श्रीवेङ्कटेश्वर' (स्टीम्) मुद्रालयाध्यक्षेणस्वीयमुद्राक्षालायां

संमुद्रितं विजयते ।

माघ, संवत् १९६०, शके १८२५.

...मुद्रणाधिकारः १८६७ तमाब्दिक २५
...गतियमानुसारेण प्रकाशकाधीनः ।

02X
804
ISN60
709

THE ACADEMY OF SANSKRIT RESEARCH
MELKOTE - 571431.
(KARNATAKA STATE)

Q

(0.D.L)

Accn. No. 5709

श्रीः ॥

श्रीहयवदनपरब्रह्मणे नमः ॥

अथ वचस्सुधातत्त्वं प्रारभ्यते ॥


THE ACADEMY OF SANSKRIT
MELKOTE
(KARNATAKA STATE)

प्रच्छन्नप्रकटप्रकृत्युपहितैश्शाक्यादिभिर्वादिभिः
प्रक्षीणामवितुं त्रयीसरणिमुद्दण्डं त्रिदण्डं वहन् ॥
भूमावाविरभूदभूमिमहिमा प्राचामवाचां तथा
वाचां यो भगवान्स मेऽस्तु विपदुत्तीराय नारायणः ॥ १ ॥
आचार्याणां पदाम्भोजद्वन्द्वमाधाय मानसे ॥
वचस्सुधारसास्वादादेष धन्यो बुभूषति ॥ २ ॥
नाशृण्वन्ये सकृदपि सदेशिकवचस्सुधाम् ॥
ते कथं वेत्तुमर्हन्ति व्यासार्यस्य वचस्सुधाम् ॥ ३ ॥
यद्रूपकप्रकरणादिति हेतुयुग्मात्
षष्ठीसमासमवधूय वचस्सुधोक्तौ ॥
टीकाकृदाह भगवानपरं समासं
तस्याशयं विशदयामि गुरोः प्रसत्त्या ॥ ४ ॥
हास्यो हि स्वककल्पनाकुशलतावेशेन सदेशिक-

---

(१) "काणादशाक्यपाषण्डैस्त्रयीधर्मो विलोपितः ॥
त्रिदण्डधारिणा पूर्वं विष्णुना रक्षिता त्रयी ॥" इत्यादिस्मृतिः "प्रकटरायुं प्रच्छन्नरायुमिरुंदुळळ पाषण्डिहळालुपरोधं वारामैक्काह" इत्यादिरहस्यसूक्तिश्चेहाभिसंहिता ॥

प्रेक्षालेशविदेशभूरवतरंस्तत्त्वार्थनिर्धारणे ॥
स्वेनैवाञ्जलिना निरस्य जलधेरन्तर्जलं सन्मणी
नादित्सुर्न भवेत्किमूर्मिभरतो भग्नो निमग्नोपि च ॥ ५ ॥



आस्ति किल श्रीभाष्यस्योपक्रमे द्वितीयं मङ्गलपद्यं—
"पाराशर्यवचस्सुधामुपनिषद्दुग्धाब्धिमध्योद्धृतां
संसाराग्निविदीपनव्यपगतप्राणात्मसञ्जीविनीम् ॥
पूर्वाचार्यसुरक्षितां बहुमतिव्याघातदूरास्थिता—
मानीतांतु निजाक्षरैः सुमनसो भौमाः पिबन्त्वन्वहम्" ॥
इति ॥ एतत्पद्यटीकायां च श्रुतप्रकाशिकायां वचस्सुधामिति प्रतीके " वचःशब्दस्यार्थं तात्पर्य—यथा वेदविच्छास्त्रविदित्यादौ वेदादिशब्दानाम् । अर्थाभिधायकं हि वाक्यम् । वचसः सुधामिति केचिदाचार्याः ॥ रूपकप्रकरणात्सुधाशब्दलक्षणाभयाच्च सुधेव वच इति "उपमितं व्याघ्रादिभिः" इत्यादिना समासमपर आचार्या आद्रियन्ते ॥ सुधाशब्देन भोग्यत्वमभिप्रेतम् " इति व्याचख्युर्व्यासार्याः ॥

श्रुतदीपिकायां च त एव " वचःशब्दोथपर्यन्तः । वचसः सुधामिति निर्वाहो रूपकप्रकरणानुचितः । सुधाशब्दामुख्यत्वं च । अमृतत्वहेतुत्वात्सुधात्वरूपणम्" इत्येवं व्याचक्षिरे ॥

अथ अत्र श्रुतप्रकाशिकायां रूपकप्रकरणादिति हेतुद्वयं षष्ठीसमासपरित्यागे उपमितसमासपरिग्रहे च साधकतयोप-

न्यस्तमित्यवगम्यते ॥ तदिदं न सङ्गच्छते ॥ तथा हि । वचसः सुधेति षष्ठीसमासे सुधात्वेनार्थस्य निगीर्याध्यवसानाद्यथैवोपनिषदुग्धाब्धीत्यादिविशेषणावधृतस्य रूपकालङ्कृतिप्रकरणस्य भङ्गः-तथैव वचः सुधेवेत्युपमितसमासेपि तथाविधरूपकालङ्कृतिप्रकरणभङ्गस्तदवस्थः । उपमितसमासे उपमालङ्कृतेरेव प्रसारात्॥ एवं यथैव षष्ठीसमासपक्षे सुधाशब्देन सुधात्वेनापि रूपेणाशक्यार्थस्य प्रत्यायने लक्षणा सुधाशब्दे—तथैवोपमितसमासपक्षेपि सुधासदृशे सुधाशब्दस्याविशिष्टा लक्षणा॥

न चोपमितसमासे सुधाशब्दस्य सुधासदृशलक्षणाऽऽनुशासनिकी न दोषमावहति। षष्ठीसमासे तु सुधाशब्दस्यार्थे लक्षणा साम्प्रतिकी दोषमावहेदेव । अत एवेन्द्रपीताधिकरणे " वसुमद्गणस्य सोमदेवते मतिविदः प्रातस्सवनस्य गायत्रच्छन्दस इन्द्रपीतस्य मधुमत उपहूतस्योपहूतो भक्षयामि" इति "मन्त्रे इन्द्रपीतपदे इन्द्रेण पीत इति तत्पुरुषस्वीकारे ते इति निर्दिष्टे ऋत्विग्भिर्भक्ष्यमाणसोमे इन्द्रपीतत्वमसंभवीति पीतपदे पीताशिष्टे पीतापीतसमुदायैकदेशे लक्षणा स्वीकार्या । सा च साम्प्रतिकीति न युक्ता । अतः इन्द्रेण पीतं यस्मिन् सवने इति वा इन्द्रः पीतो यस्मिन् सवने इति वा सवनविशेषणतामाश्रित्य पदद्वयलक्षणापादकोपि बहुव्रीहिरेव स्वीकर्तुं युक्तः" इति राद्धान्तितं शेषलक्षणे पूर्वतन्त्रे । तथा च सुधाब्दलक्षणाभयादित्यस्य सुधाशब्दे साम्प्रतिकलक्षणा-

भयादित्येवार्थ इति नानुपपत्तिः । स्पष्टं चेदं श्रुतप्रकाशिकाव्याख्याया भावप्रकाशिकायामिति वाच्यम्॥ एवमपि रूपकप्रकरणादिति हेत्वसङ्गतेर्दुर्वारत्वादिति चेत् ॥

अत्र कश्चित्—रूपकप्रकरणादिति हेतुयुगलं केचिदाचार्या इति पूर्वग्रन्थेनैवान्वेति न तूत्तरग्रन्थेनेति नोक्तानुपपत्तिः ॥ तथाहि।उपमितसमासपक्षे हि वचस्सुधाशब्दे उपमालङ्कारस्यैवावतारात्सुधाशब्दस्य सुधासदृशलाक्षणिकतावश्यकत्वाच्च रूपकप्रकरणभङ्गः सुधाशब्दलक्षणाप्रसङ्गश्चेति दोषद्वयमिह विवक्षितम् । षष्ठीसमासपक्षे तु सुधाशब्देन सुधात्वेनार्थस्य निगीर्याध्यवसानेऽतिशयोक्तिरवतारेपि तस्या उत्तरविशेषणावधृतरूपकानुप्राणितत्वसंभवेन न रूपकप्रकरणभङ्गः । दृश्यते ह्येवमतिशयोक्तौ रूपकानुप्राणितत्वं—

' परिमृज्य भुजाग्रजन्मना पतगं कोकनदेन नैषधः ॥
मृदु तस्य मुदेऽकिरद्गिरः प्रियवादामृतकूपकण्ठजाः ॥'

इत्यादौ ॥ अर्थस्य सुधाशब्देन सुधात्वेनैव बोधस्येहाभिमततया लक्षणाप्रसङ्ग एवात्र नावतरति ॥ इत्थं च रूपकप्रकरणादिति हेतुद्वयमुपमितसमासपरित्यागे षष्ठीसमासपरिग्रहे च साधकतया व्यासार्यैरिहोपन्यस्तमित्याह ॥ तदसत्॥उपदर्शितश्रुतदीपिकासन्दर्भं रूपकप्रकरणभङ्गसुधाशब्दलक्षणाप्रसङ्गयोः षष्ठीसमासपरित्यागहेतुतायाः स्पष्टमभिधानेन श्रुतप्र-

काशिकाया तयोः षष्ठीसमासपरिग्रह एव हेतुतयोपन्यासे टीकाकृतामुन्मत्तताप्रसङ्गात् ॥ न खलु ताभ्यामेव हेतुभ्यां तत्पक्षस्यैव परिग्रहं परित्यागं चानुन्मत्तःकश्चिद्ब्रवीति॥किञ्चै एवंव्यासार्याणां तात्पर्यं सत्युपमितसमासपक्षमेव प्रथमं विलिख्य"रूपकप्रकरणात्सुधाशब्दलक्षणाभयाच्च वचः सुधामिति समासं केचिदाचार्या आद्रियन्ते"इत्येव वाक्यं लिख्येत तैर्विस्पष्टविलेखकैः । यथावस्थितलेखनं तु भवदुक्ततात्पर्यं लेखितुरव्युत्पन्नतामेव प्रकटयेत् । दूष्यं हि पक्षं प्रथममभिधाय तद्दूषणपुरःसरं पक्षान्तरमनन्तरमभिधातुं साम्प्रतम् ॥ अपि च–वचस्सुधाशब्दे उपमितसमासमङ्गीकुर्वद्भिरुत्तरविशेषणेष्वप्युपनिषद्दुग्धाब्धिरित्यादिरीत्योपमितसमासेनोपमालङ्कारस्यैवाङ्गीकाराद्रूपकस्य प्रकरणमेव दुर्लभमिति कथमुपमितसमासपक्षे रूपकप्रकरणभङ्गो दोष उद्भाव्येत ॥ न चोपमितसमासापेक्षया रूपकसमासस्यैव प्रकरणे प्रस्फुटा प्रतीतिरिति रूपकप्रकरणभङ्गो दोष उक्त इति वाच्यम् ॥ एवं सति हि प्रस्फुटप्रतीयमानरूपकभङ्ग एव दोषतया वक्तव्यो न तु रूपकप्रकरणभङ्गः ॥ किञ्च–ईदृशस्थले स्फुटप्रतीतिरपि रूपकस्य दुर्वचा ॥ उपमेयवाचकपदोत्तरोपमानवाचकपदस्थले उपमारूपकयोरेकतरनिर्णायकविरहे सन्देहसङ्करस्यैव स्वीकारात् । उपमापेक्षया रूपकस्यैव स्फुटप्रतीतिकत्वे च तयोस्संदेहसङ्करकथनमालङ्कारिकाणामसङ्गतमाप-

द्येत ॥ तस्माद्रूपकप्रकरणादित्यस्योपमितसमासपरित्यागे षष्ठीसमासपरिग्रहे च हेतुताकथनमसमञ्जसमेव ॥ एवमतिशयोक्तेःरूपकानुप्राणितत्वे 'परिमृज्य' इति पद्योदाहरणमप्यसमञ्जसमेव । तत्पद्ये रूपकरूपकातिशयोक्त्योः संसृष्टिसत्त्वेप्यङ्गाङ्गिभावविरहात्॥ एवं सुधाशब्दे सुधात्वेनार्थप्रत्यये लक्षणाविरहान्मुख्यत्वमित्यभिधानमपि तथैव ॥ अशक्यस्य विना लक्षणां प्रत्ययासंभावात् ॥ अन्यथा " गौणश्चेन्नात्मशब्दात् " इत्यत्रेक्षतेः सर्गनियतपूर्वावस्थापरत्वे सूत्रकृतो गौणत्वाभिधानं " वृष्टिप्रतीक्षाः शालयः" " वर्षेण बीजं प्रतिसंजहर्ष " इत्यनयोः लौकिकशास्त्रीयप्रयोगयोर्गौणतया मुख्यत्वविरहाभिधानं च भाष्यकृतामनुपपन्नमेवापद्येत ॥ तत्रापि भवदुक्तरीत्या इक्षात्वप्रतीक्षात्वहर्षत्वादिरूपैस्तत्तदचेतनधर्माणां मुख्ययैव वृत्त्या बोधापत्तेः ॥ एवं पूर्वतन्त्रेपि श्येनाग्निहोत्रप्रायणीयादिपदानामपि कर्मविशेषे गौणतावर्णनं सूत्रभाष्यवार्तिकादिदृष्टं विरुध्येत । अत एवानुगृहीतं तत्त्वटीकायामाचार्यैः—"वचसः सुधेति विग्रहे सुधाशब्दस्य गौणीवृत्तिः " इति । श्रुतदीपिकायामपि—" वचस सुधामिति निर्वाहो रूपकप्रकरणानुचितः सुधाशब्दामुख्यत्वं च" इति षष्ठीसमासे सुधाशब्दामुख्यत्वं स्पष्टमुक्तम् । तस्मात्सुधाशब्दलक्षणाभयादिति हेतोः षष्ठीसमासपरिग्रहहेतुताभिधानमप्यसमञ्जसमेव॥तदत्र कथं श्रुतप्रकाशिकासूक्तिसङ्गतिरिति चेत् ॥

अत्रोच्यते ॥ रूपकप्रकरणादित्यादिहेतुद्वयस्योत्तरसन्दर्भेणैवान्वयो न तु पूर्वसन्दर्भेण । तत्र च द्वितीयहेतोः सङ्गतिः प्रागुपपादितैव लक्षणापदस्य साम्प्रतिकलक्षणापरतावर्णनेन । आदिमस्य तु हेतोः सङ्गतिरवशिष्यते वक्तव्या ॥ सापि तत्र रूपकपदस्योपमापरताश्रयणेनैव सुवचा ॥ तथाहि-रूपयतिर्हि उपमानारोप इवोपमायामपि प्रयुज्यते " रूपकं रूपितारोपात् " इत्यादौ । उपमेयोपमानयोरित्यर्थं च " रूप्यरूपकयोः" इत्यालङ्कारिकैः प्रयुज्यते ॥ ततश्चेह रूपकप्रकरणादित्यस्योपमाप्रकरणादित्येवार्थः।वचस्सुधाशब्दे उपमितसमासस्वीकारे उत्तरविशेषणावधृतस्य रूपकशब्दितोपमाप्रकरणस्यानुगुण्यम् । षष्ठीसमासपक्षे तु तद्भङ्ग इत्युपमितसमास एव युक्त इति तदभिप्रायान्न काचिदनुपपत्तिरिति ॥

इदमत्रावधेयं—प्राचीनाः खल्वालङ्कारिका मुखं चन्द्र इत्यादौ व्यासस्थल एव रूपकमलङ्कारमभ्युपगच्छन्ति न तु मुखचन्द्र इत्यादौ समासेपि । उपमामेव त्वलङ्कारं तत्राचक्षते। तदाह काव्यालङ्कारसूत्रवृत्तौ तत्रभवान्वामनः—" उपमानोपमेयस्य गुणसाम्यात्तत्त्वारोपो रूपकम् " इति रूपकसूत्रवृत्तौ— " इयं गेहे लक्ष्मीरियममृतवर्तिर्नयनयो—

रसावस्याः स्पर्शौ वपुषि बहलश्चन्दनरसः ॥
अयं कण्ठे बाहुः शिशिरमसृणो मौक्तिकसरः
किमस्या न प्रेयो यदि परमसह्यस्तु विरहः ॥ "

इतीदं पद्यमसमस्तोपमानोपमेयकमेवोदात्दृत्य " मुखचन्द्रादीनां तूपमासमासान्न चन्द्रादीनां रूपकत्वं युक्तम्" इति ॥ संसृष्टिप्रकरणे च स एव " तद्भेदावुपमोत्प्रेक्षावयवौ" इति सूत्रे "उपमाजन्यं रूपकमुपमारूपकम् इति । यथा—निरवधि च निराश्रयं च यस्य स्थितमनिवर्तितकौतुकप्रपञ्चम् । प्रथम इह भवान्स कूर्ममूर्त्तिर्जयति चतुर्दशलोकवल्लिकन्दः ॥ एवं रजनिपुरन्ध्रिलोध्रतिलकश्चन्द्रः इत्यादौद्रष्टव्यम् ॥ " इत्याह ॥

अयमिह तत्रभवतो वामनस्य भावः—मुखचन्द्र इत्यादौ मुखं चन्द्र इवेत्युपमितसमासेनोपमालङ्कार एव युक्तः। " उपमितं व्याघ्रादिभिः सामान्याप्रयोगे" इत्यनुशासनसद्भावात् न तु मुखमेव चन्द्र इति समासेन रूपकमलङ्कार इति।तथाविधसमासस्यानुशासनविरहेणासाधुत्वात् ॥ न च"मयूरव्यंसकादयश्च" इत्येतदेवानुशासनं तथा समासं विदधातीति वाच्यम् ॥ मयूरव्यंसकादिगणे ईदृशशब्दस्य कस्याप्यपठनात् । मयूरव्यंसकशब्दस्तु मयूर इव व्यंसक इत्युपमितसमासपरतया प्रतिपदविहितोपमानसमासविषयपूर्वपदप्रकृतिस्वरबाधनार्थो मयूरो व्यंसक इति विग्रहपरतया विशेषणवाचिव्यंसकपदपरनिपातार्थो वा वर्णितः कैय्यटादौ । सर्वेपि चोपमेयोपमानवाचकपदावयवकसमासाः " उपमितम् " इत्याद्यनुशासनेनैव सिद्धा इत्यनन्यथासिद्धप्रयोगविरहान्मुखचन्द्रादिपदान्माकृ-

तिगणरूपेपि तद्गणे पाठानुमाने न किञ्चित्प्रमाणमुपलभामहे॥

तस्मान्मुखचन्द्रादिशब्दे उपमितसमास एव उपमैव चालङ्कार इति युक्तमाश्रयितुम् । अत एव "जयति चतुर्दशलोकवल्लिकन्दः" इत्यादावपि न परम्परितरूपकं शक्यं वक्तुम् । चतुर्दशलोका एव वल्लिरिति समासासंभवेन रूपकहेतुरूपकानुन्मेषात्।किन्तु चतुर्दशलोका वल्लिरिवेत्युपमितसमासात्प्रथममुपमा—ततश्चतुर्दशलोकवल्लयाः कन्द इति समासेन वल्लीसदृशचतुर्दशलोककन्दत्वारोपाद्वल्ल्युपमाजनितं कन्दरूपकम् । वल्ल्युपमां विना कन्दे लोकसंवन्धस्य विवक्षितस्य दुरुपपादतया वल्लीतुलितलोकसम्बन्धविशिष्टकन्दरूपकं वल्ल्युपमाजनितमित्युच्यते ॥ तथा चात्रोपमारूपकयोः संसृष्टिरेवेति । इत्थमेव "रजनिपुरन्ध्रिलोध्रतिलकश्चन्द्रः" इत्यत्रापि पुरन्ध्रितुल्यरजनिसंवन्धिलोध्रतिलकत्वारोपात्पुरन्ध्र्युपमाजनितं लोध्रतिलकरूपकं बोध्यमिति ॥

तदिदं वामनमतमभिप्रेत्य वचस्सुधामित्यादावपि वच एव सुधेत्यादिसमासासंभवमभिसंधाय वचः सुधेवेत्युपमितसमासः प्रदर्शितः श्रुतप्रकाशिकायां व्यासार्यैः ॥

नव्याः पुनरालङ्कारिकाः 'मुखचन्द्रः' इत्यादौ मुखं चन्द्र इति रूपकालङ्कारौपयिकः समासः साधुरेवेति समासेपि रूपकमङ्गीकुर्वन्ति ॥ यथाह दण्डी—

"उपमैव तिरोभूतभेदा रूपकमुच्यते ॥

यथा बाहुलता पाणिपद्मं चरणपल्लवः ॥
अङ्गुल्यः पल्लवान्यासन्कुसुमानि नखार्चिषः ॥
बाहू लते वसन्तश्रीस्त्वं नः प्रत्यक्षचारिणी ॥
इत्येतदसमस्ताख्यं समस्तं पूर्वरूपकम् ॥
स्मितं मुखेन्दोर्ज्योत्स्नेति समस्तव्यस्तरूपकम्॥" इति॥

न च तथा समासेनुशासनस्य विरह इति शङ्क्यम् । "मयूरव्यंसकादयश्च" इत्यस्यैव तदनुशासनत्वात् ॥ न च मयूरव्यंसकादिगणे तादृशः शब्दो नैव पठ्यत इति देश्यम्॥"सुन्दरो मुखचन्द्रः" "भाष्याब्धिः क्वातिगम्भीरः" इत्यादिप्रयोगप्रामाण्यानुरोधेनैव तादृशशब्दानामाकृतिगणे तस्मिन्पाठकल्पनात्। तत्र हि सुन्दर इत्यादिसामान्यप्रयोगान्नोपमितसमासेनान्यथासिद्धिः । उपात्तधर्मादतिरिक्तस्यैव धर्मस्य सामान्यताविवक्षया तत्रोपमितसमासोपपादनं तु सुन्दरादिविशेषणोपादानवैयर्थ्यापादकतया नातीव स्वरसम् ॥

तस्मात्तथाविधप्रयोगस्वारस्यानुरोधान्मुखचन्द्रादिशब्दानां मयूरव्यंसकादिगणे पाठानुमानमेव युक्ततरम् । अत एवोक्तं वृत्तौ काशिकायाम् "अविहितलक्षणस्तत्पुरुषो मयूरव्यंसकादिषु द्रष्टव्यः"इति । अयमेव च मुखचन्द्रादिपदे समासो मयूरव्यंसकादिसमास इति स्पष्टमप्पय्यदीक्षितादिभिर्व्यवह्रियते कुवलयानन्दादौ ॥ रसगङ्गाधरकारादिभिस्तु विशेषणसमास इत्येवायं व्यवह्रियते। तथा च गौणीनिरूपणप्रकरणे"उपमारू

पकयोरुपमितसमासविशेषणसमासाधीनयोः" इति रसगङ्गाधरवाक्यमादाय "उपमित विशेषणेति –" उपमितं व्याघ्रादिभिः" "मयूरव्यंसकादयश्च" इत्यर्थः" इति व्याचख्यौ नागेशभट्टः॥ इहैवं व्याचक्षाणोप्ययं यद्रूपकप्रकरणे–" विशेषणसमासे तु रूपकम् " इति रसगङ्गाधरवाक्यमधिकृत्य "विशेषणसमासे त्विति–चिन्त्यमिदम् । चन्द्रमुख इत्यस्यापत्तेः। परिणामालङ्कारोदाहरणे तु विशेषणसमास उचितः अत्र तु मयूरव्यंसकेति समासे त्वित्युचितम् " इत्येवं स्वोक्तिव्याहतं खण्डनमाचकार। तदिदं विचक्षणा एव विचारयन्तु ॥ मयूरव्यंसकादिसमासोपि हि "विशेषणं विशेष्येण बहुलम्" इत्येतत्प्रकरणस्थत्वाद्विशेषणसमास इति व्यवहर्तुमुचितः । अथवा "विशेषणं विशेष्येण बहुलम् " इत्येतदनुशासनविहित एव समासो विशेषणसमास इति रसगङ्गाधरकृतोभिमतः॥ न चैवं मुखचन्द्र इत्यत्र चन्द्रपदस्य पूर्वनिपातापत्तिः । समासेऽत्र विषयिप्राधान्यस्यैवस्वीकारेण मुखस्यैव विशेषणत्वात् ॥

इयांस्तु विशेषः–यत्–रूपकतात्पर्ये मुखपदार्थस्य स्वनिष्ठाभेदप्रतियोगित्वसम्बन्धेन चन्द्रपदार्थेऽन्वयः । परिणामतात्पय तु स्वप्रतियोगिकाभेदानुयोगित्वसम्बन्धेन।विशेषणत्वं तूभयत्र मुखस्यैव। स्पष्टं चेदं परिणामप्रकरणे रसगङ्गाधरे– "श्रावंश्रावं वचःसुधाम्"इत्यत्र "विशेषणसमासगतपरिणामे वचनाभिन्नां सुधामिति पायंपायं वचःसुधामिति रूपके तु

वचोनिष्ठाभेदप्रतियोगिनीं सुधामिति बुद्धिः" इति सन्दर्भे ॥ न चोपमानस्य चन्द्रादेर्विशेषणत्वविवक्षायां चन्द्रमुखमिति प्रयोगापत्तिः ॥ बहुलग्रहणादेव तद्वारणसंभवात् । अत एवापठितजातीयानां मुखचन्द्रादिपदानां मयूरव्यंसकादिगणे पाठकल्पनागौरवमपि नाश्रयणीयमिति ॥ यद्वा—"सह सुपा" इत्यनेन विहितः समास एव विशेषणसमासत्वेन रसगङ्गाधरेविवक्षितः । तत्र ह्यनुशासने "सुपा" इति योगं विभज्य "सुपा च सुप्समस्यते । अधिकारश्च लक्षणं च । यस्य समासस्यान्यल्लक्षणं नास्ति इदं तस्य लक्षणं भविष्यति । पुनरुत्स्यूतं वासोदेयं । पुनर्निष्कृतोरथ इति" इति भाषितम्॥ सर्वथा सिद्धं समासे रूपकमित्याचक्षते ॥

तदिदं दण्ड्यादीनां नवीनालङ्कारिकाणां मतमभिसन्धाय श्रुतदीपिकायाम् " अमृतत्वहेतुत्वात्सुधात्वरूपणम्" इत्यनेन वच एव सुधेत्यादिसमासं तन्निबन्धनं रूपकालङ्कारं च प्रकाशयामासुर्व्यासार्याः ॥ प्राचीननवीनभेदाभिन्नयोः पक्षयोर्हि ग्रन्थभेदेन निवेशनं युज्यतेतराम् ॥ अत एव श्रुतप्रकाशिकायामुपमालङ्काराभिप्रायेण सुधाशब्देन भोग्यत्वमभिप्रेतमिति सुधोपमायां भोग्यत्वं साधारणधर्मः प्रदर्शितः । रूपके त्वलङ्कारे साम्यातिशयस्यावश्यकत्वाद्भोग्यत्वधर्मो नालमित्यमृतत्वहेतुत्वं भोग्यविशेषैकनिष्ठं साधारणधर्मतयां निरदेशि ॥ अतिसाम्य एव रूपकमितीदं तु काव्यप्रकाशादावेव व्यक्तमित्यवधेयम् ॥

अथैवमपि श्रुतप्रकाशिकायामुपमाप्रकरणादिति वक्तव्ये रूपकप्रकरणादित्युक्तिरयुक्तैव । संभवतः प्रसिद्धशब्दप्रयोगस्योपेक्षणायोगादिति चेत् ॥

न ॥ उपमारूपकालङ्कारयोस्तन्त्रेणोपादानार्थमेव तत्र रूपकपदोपादानात् ॥ तदपि तन्त्रेण तयोरुपादानमुपमितसमासमयूरव्यंसकादिसमासपक्षयोर्विभिन्नमताभिमतयोः षष्ठीसमासपक्षीयदोषविरहमेकोक्त्यैव प्रतिपादयितुम् । प्रयुज्यते चैवं तन्त्रेण रूपकपदं निबन्धेषु । यथा—भावप्रकाशिकायामत्रैव प्रकरणे—"ननु स्वाभिमते उपमितं व्याघ्रादिभिर्मयूरव्यंसकादयश्चेति सूत्रानुशिष्टरूपकसमासेपि सुधाशब्दलक्षणाऽविशिष्टा" इति ॥

वस्तुतस्तु श्रुतप्रकाशिकायां रूपकप्रकरणादित्यस्य रूपकालङ्कारप्रकरणादित्यर्थोपि न व्याहन्यते । वचः सुधेवेत्युपमितसमासेपि रूपकालङ्कारस्यैव निबन्धकारैरङ्गीकारात्॥षष्ठीसमासपक्षे हि निगीर्याध्यवसानेन रूपकातिशयोक्तिसंभवेप्युत्तरविशेषणावधृतस्य रूपकप्रकरणस्य भङ्गो दुरुद्धरः ॥ अत एव तत्त्वटीकायामाचार्यैः—" अत्र वचसः सुधेति विग्रहे सुधाशब्दस्य गौणी वृत्तिः रूपकप्रकरणानुरूप्येण वा वचः शब्दलक्षितस्तदर्थः सुधात्वेन रूप्यते । यद्वा सूत्रमेव सुधेति रूपितम् उपनिषद्धिमशैत्यन्यायरूपार्थद्वारा—आनीतत्वाद्युपपत्तिः " इति रूपकमलङ्कारं प्रकाश्य " निजाक्षरानीतादिसामान्यप्रयोगे कथमिहो-

पमितामित्यादिना समासः । इत्थं।समाससूच्यं स्वादुत्वमिहाप्रयुक्तम् । तदन्यस्य प्रयोगेपि न दोषो "भाष्याब्धिः क्वातिगम्भीरः" इत्यादिवत्–

साधर्म्यात्स्वादुतासिद्धिस्तया स्वादुतमत्वधीः ॥
वैधर्म्यादिति वैषम्यं भाव्यमत्र मनीषिभिः ॥
यद्विवक्षितसामान्यं तत्प्रयोगो निषिध्यते ॥
उक्तिस्तदन्यसामान्यविषया न विरुध्यते ॥
विवक्षितं तु सामान्यं स्वादुत्वादिकमिष्यते ॥
तत्पुनर्नोच्यते साक्षात्समासस्तेन सिध्यति ॥
अविवक्षितसामान्यप्रयोगः काव्यशास्त्रयोः ॥
दृश्यते बहुशस्तस्मात्समासोऽत्र न दूष्यते ॥"

इत्यनेन महता संरंभेणोपमितसमास एव समर्थितः । एतस्याश्चोपमितसमासे रूपकालङ्कारोक्तेः श्रुतप्रकाशिकातत्त्वटीकागतायाः प्राचीनालङ्कारिकनिबन्धेष्वपि संवादो दृश्यते। यथा सरस्वतीकण्ठाभरणे चतुर्थपरिच्छेदे–

"यदोपमानशब्दानां गौणवृत्तिव्यपाश्रयात् ॥
उपमेये भवेद्वृत्तिस्तदा तद्रूपकं विदुः ॥"

इति कारिकया रूपकं लक्षयित्वा–

" शब्दार्थोभयभूयिष्ठभेदात्त्रेधा तदुच्यते ॥ "

इत्यादिना विभज्य " तेषु समस्तं यथा–

पाणिपद्मानि भूपानां सङ्कोचयितुमीशते ॥
त्वत्पादनखचन्द्राणामर्चिषः कुन्दनिर्मलाः ॥ "

इत्युदाहृत्य अत्र "उपमितं व्याघ्रादिभिः सामान्याप्रयोगे"

इति समासे पद्मानीव पद्मानि चन्द्रा इव चन्द्राः इत्यभेदोपचारेणोत्पन्नसादृश्यात्पाणीनां नखानां च पद्मचन्द्रादिभिराभिधाने सामान्येवादिशब्दाप्रयोगादुपमानार्थस्तिरोभूत इति सोयं गौणशब्दव्यपाश्रयः समासहेतुकः समस्तरूपकं नाम प्रकृतरूपकेषु शब्दभूयिष्ठरूपकभेदः " इति व्यवारि ॥ इह पाणिपद्मानीत्यादौ रूपकोदाहरणे उपमितसमासं वदतो भोजदेवस्य पाणय एव पद्मानीत्यादिसमासे अनुशासनविरह एव पूर्वोक्तरीत्या वामनस्येवाभिमतः ॥

इर्यांस्त्वनयोर्विशेषः—यत् वामनो मुखचन्द्र इत्यादौ शाब्दप्रतीतिप्राधान्यमाश्रित्योपमामेवालङ्कारं मनुते—भोजदेवस्तु तत्र चन्द्रपदेन चन्द्रसदृशलक्षणायामपि श्लेषभित्तिकाभेदाध्यवसायनीतिदिशा चन्द्रपदेनोपादानबलाच्चन्द्रसदृशे चन्द्रतादात्म्यप्रतीतौ चन्द्राभिन्नचन्द्रसदृशाभिन्नतया भासमाने मुखेपि चन्द्रतादात्म्यं प्रतीयत इति पार्यन्तिकप्रतीतिप्राधान्यमाश्रित्योपामितसमासेपि रूपकमेवालङ्कारमाद्रियते ॥ एतदभिप्रायेणैव व्युत्पत्तिवादेपि । मुखचन्द्र इत्यादिरूपकस्थले चन्द्रादिपदस्य चन्द्रसदृशे लक्षणया मुखे चन्द्रसदृशाभेदान्वयबोध एवेत्याभिहितं भट्टाचार्येण ॥ न चैवं सत्युपमारूपकयोरवैलक्षण्यप्रसङ्ग इति शङ्क्यम्॥ उपमानपदेनोपमेयविवक्षायामेव रूपकं तदविवक्षायां तूपमैवेत्येवं वैलक्षण्यात् ॥ न चैवं लुप्तावलोपप्रसङ्ग इति शङ्क्यम् ॥ तटिद्गौरीत्यादेर्लुप्तोपमोदाहरणत्वे बाधकविरहात् । यत्र ह्युपमानवाचकपदेनोपमेयं तत्सदृशत्वेन लक्ष्यते—तत्रैव हि रूप कमङ्गीक्रियते।

तटित्पदं तु तटित्सादृश्यमेवाहेति नात्र रूपकप्रसक्तिः ॥ एवमन्यत्रापि । परं तु काव्यप्रकाशादौ धर्मवाचकलुप्ता या समासगोपदर्शिता "राजते राजकुञ्जरः" इत्यादौ सैवैतन्मते न युज्यते । न युज्यतां किं तेन । काव्यप्रकाशादिमते एकोनविंशतिर्लुप्ताभेदाः सरस्वतीकण्ठाभरणादिकारमते त्वष्टादशैव लुप्ताभेदा इति मतभेदसंभवादिति ॥

इयती पुनरत्र भिदा-आलङ्कारिकाणां नैयायिकानां चायदालङ्कारिकाश्चन्द्रपदेन चन्द्रसदृशोपादानबलाच्चन्द्रतादात्म्यप्रत्ययं लक्षणाफलं व्यञ्जनया शाब्दं स्वीकुर्वन्ति तत्र नैयायिकास्त्वाहार्यशाब्दानङ्गीकाराद्विशेषदर्शिनामपि शाब्दबोधनिर्वाहायव्यङ्ग्यार्थप्रतीतिं मानसीमेवाहार्यरूपामभ्युपगच्छन्तीति।

तदेवं रूपकस्थले रूपकातिशयोक्तिस्थले चोपमानवाचिपदस्योपमानसादृश्यप्रकारेणोपमेयलाक्षिणिकता सकलतान्त्रिकसंमता। सैव च सिद्धान्तिभिरपि स्वीक्रियत इति सैव समाश्रिता श्रुतप्रकाशिकाचार्यैः ॥

यत्तु--यद्यपि रूपकस्थले सारोपाख्यां निगीर्याध्यवसानस्थले च साध्यवसानाख्यां च लक्षणां स्वीकृत्य बोधवैचित्र्यं स्वीकुर्वन्त्यालङ्कारिकाः ॥ तथापि मुखचन्द्र इत्यादौ रूपकस्थले शाब्दबोधे विषयविषयिवाचकशब्दाभ्यां शक्तिवशादुपस्थितयोरुपमेयतावच्छेदकावच्छिन्नोपमानतावच्छेदकावच्छिन्नयोरैक्यभानमात्रस्य निगीर्याध्यवसानस्थले विषयिवाचकचन्द्रादिशब्देन शक्तिवशाच्छक्यतावच्छेदकभूतोपमानतावच्छेदकचन्द्रत्वादिरूपेण मुखादिविषयभानमात्रस्त

चानुभवसिद्धत्वादधिकांशस्य मानसधीमात्रविषयतायाः स्वीकारमात्रेण चारितार्थ्यसंभवे शाब्दबोधे तद्भानानावश्यकत्वादालङ्कारिकव्यतिरिक्तेषु कैरपीदृशलक्षणाङ्गीकारादर्शनादालङ्कारिकेष्वपि नव्यैः रूपकोपमाद्यलङ्काराणां स्वरूपैक्यप्रसङ्गानुभवविरोधादिदोषवशेनेदृशलक्षणोपेक्षणेन रूपकादिस्थले यथोक्तरीत्यैव बोधाङ्गीकारदर्शनाच्च श्रुतप्रकाशिकाचार्याणामपि रूपकरूपकातिशयोक्तिस्थले यथोक्तरीत्याऽन्वयबोधस्याभिमतत्वान्न तत्र लक्षणाप्रसङ्गावकाश इत्येवाभिमतमित्याह कश्चित्—

तदसत् ॥ रूपकातिशयोक्तिस्थले लक्षणाविरहस्य व्यासार्याभिमतत्वे "गौणश्चेन्नात्मशब्दात्" इति सूत्रभाष्यटीकावाक्यानामसाङ्गत्यप्रसङ्गस्य प्रागेव प्रदर्शितत्वात्। एवं रूपकस्थलेपि लक्षणाविरहस्य व्यासार्याभिमतत्वे "स्याच्चैकस्य ब्रह्मशब्दवत्" इति सूत्रटीकाविरोधः। तत्र हि—एकस्यैव शब्दस्येकस्मिन्प्रकरणे मुख्यामुख्यार्थपरतायां प्रकृतायां "तपसा ब्रह्म विजिज्ञासस्व तपो ब्रह्मेति" इत्यादिप्रयोगोनुसन्धेयः। "अन्नं ब्रह्म" "आनन्दो ब्रह्म" इत्यादिप्रयोगानुदाहरणं। तस्य मुख्यामुख्यविषयत्वाभावात्। अन्नादिष्वपि ब्रह्मबुद्ध्या हि ब्रह्मशब्दप्रयोगः" इत्यभिहितम्। "तपो ब्रह्मेति" इत्यादावपि भवदुक्तरीत्योपमानोपमेयसामानाधिकरण्यस्थल इव कार्यकारणज्ञाप्यज्ञापकसामानाधिकर-

ण्यस्थले मुख्यवृत्त्यैव निर्वाहसंभवात्तपोब्रह्मणोरैक्यारोपस्य मुख्यवृत्त्यैव संभवे "तपो ब्रह्म" इत्यादेरमुख्यत्वाभिधानम् "अन्नं ब्रह्म" इत्यादेर्मुख्यत्वाभिधानं च तत्र श्रुतप्रकाशिकाचार्याणामसङ्गतमेवापद्येत ॥

किं बहुना। पूर्वतन्त्रे तात्सिद्धिपेटिकायां महता प्रयत्नेन राद्धान्तिताया गौणवृत्तेरेव भवन्मते विलयप्रसङ्गः । "आदित्यो यूपः" "यजमानः प्रस्तरः" इत्यादावपि मुख्यवृत्त्यैव भवदभिमतमुखंचन्द्रइत्यादिप्रयोगवदुपपत्तिसंभवात् ॥

तस्मादालङ्कारिकातिरिक्तेषु कैरपीदृशलक्षणाऽङ्गीकारादर्शनादिति लेखनं मुख्यवृत्त्यैव कूपकूर्माणां सतामेव शोभते । आलङ्कारिकेषु कैश्चिदेवेदृशस्थलेषु लक्षणानङ्गीकारात् । तदतिरिक्तैरालङ्कारिकैस्तान्त्रिकैश्च सर्वैस्तत्र तदङ्गीकारात् ॥

अथ स्वतः प्रमाणस्य वेदस्य यूपादित्याद्यभेदभ्रमजनकता न संभवति ॥

"असन्निकृष्टवाचा च द्वयमत्र जिहासितम् ।
तादूप्येण परिच्छित्तिस्तद्विपर्यायतोपि वा ॥ "

इत्युक्तेः ॥ अतस्तत्र प्रमितिजनकत्वोपपत्तये " आदित्यो यूपः" इत्यादौ वैदिकवाक्ये लक्षणास्थापनं तान्त्रिकाणां युज्यते इति चेत्।

तर्हि "पाराशर्यवचः सुधाम्" इत्याद्यानां श्रीभाष्यसूक्तीनां भ्रमजनकत्वमिष्यते भवता । मुखं चन्द्रः सिंहो देवदत्त

इत्यादीनामभ्रान्तभ्रान्तिज्ञलौकिकपुरुषप्रयुक्तानामपि वाक्यानां विशेषदर्शिबोधानुरोधेन गौणलाक्षिणकत्वं हि स्थाप्यते तान्त्रिकैः। तदुक्तं तन्त्रवार्तिके तात्सिद्धसूत्रे गौणीस्थले आरोपं निराकुर्वता भट्टपादेन॥

"असङ्कीर्णस्वभावं सद्वस्तु वस्त्वन्तरात्मना।
आरोप्यतेऽभिधानार्थं कथं नु भ्रान्तिवर्जितैः॥
द्वावपि प्रतिपद्येते सिंहपुंसोर्विविक्तताम्।
नाध्यारोपयितुं शक्तिस्तेनैकस्यापि विद्यते॥" इति।

तदेवं सति किमु वक्तव्यमीदृशानां शास्त्रीयप्रयोगाणां लाक्षणिकत्वे। अन्यथा तादृशवाक्यजन्यज्ञाने प्रमात्वस्य तद्भानस्य चासंभवेन प्रामाण्यस्यौत्पत्तौ ज्ञप्तौ च स्वतस्त्वं सिद्धान्तसिद्धं व्याहन्येत॥ न खल्वप्रमात्वं वक्तृदोषविरहे संभवति। उक्तं चागमप्रामाण्ये–

"नैव शब्दे स्वतो दोषाः प्रामाण्यपरिपन्थिनः।
सन्ति किन्तु स्वतस्तस्य प्रमाणत्वमिति स्थितिः॥
वक्तुराशयदोषेण केषुचित्तदपोह्यते।
अङ्गुल्यग्रेस्ति मातङ्गयूथमित्येवमादिषु॥"

इति॥ तदिह "पाराशर्यवचस्सुधाम्" इत्यादिवक्तुर्भाष्यकृतो भगवत आशयदोषो वा भवता कल्पनीयः सुधादिपदलक्षणां समाश्रित्य तज्जन्यबोधस्य प्रामाण्यं निर्वहणीयमित्यस्मन्मते वा स्थातव्यमिति यत्ते रोचते तत्क्रियताम्॥

यदपि–प्रामाण्यस्य स्वतोग्राह्यत्वपक्षे जायमाने शब्दजन्यशाब्दबोधे प्रमात्वभानं प्रति परतोग्राह्यत्वपक्षे तद्विषयकानुव्यवसायादिलक्षणज्ञानान्तरे तद्भानं प्रति च हेतुत्वमेव योग्यताज्ञानस्य स्वीकर्तुमुचितं न तु शाब्दबोधमात्रे इति ॥

तदप्यसत् । एवं सति प्रामाण्यस्य स्वतोग्राह्यत्वभङ्गप्रसङ्गात् ॥ यत्र बोद्धुर्योग्यताज्ञानं नास्ति तत्रापि वस्तुतः प्रामाणिकवाक्याद्बोधस्य भवता स्वीकार्यतया तत्र प्रामाण्यभानासंभवेन प्रामाण्यस्य स्वाश्रययावद्ग्राहकग्राह्यत्वासंभवात् । प्रामाण्यस्य गुणजन्यत्वप्रसङ्गश्च । शाब्दबोधे हि योग्यताप्रमामेव गुणं मन्यन्ते परतस्त्ववादिनः । आकाङ्क्षासत्तिज्ञानयोरिव योग्यताज्ञानस्यापि शाब्दबोध एव हेतुता हि सिद्धान्तिनामभिमता । तथा चागमप्रामाण्ये–

"अवश्याश्रयणीयेयमन्विताभिधायिता ॥" इत्यारभ्य

"तस्मादाकाङ्क्षितासन्नयोग्यार्थान्तरसङ्गते ॥

स्वार्थे पदानां व्युत्पत्तिरास्थेया सर्ववादिभिः॥" इत्युक्तम् ॥

तस्माच्छाब्दबुद्धित्वावच्छिन्नं प्रत्येव योग्यताज्ञानस्य कारणतामङ्गीकृत्य योग्यताज्ञानविरहे शाब्दबोध एव न जायत इत्येवाश्रयणीयम् । तथा च मुखं चन्द्र इत्यादेर्यावल्लाक्षणिकता नाश्रीयते तावद्विशेषदर्शिनं प्रति बोधकत्वमेव न स्यात् । योग्यताज्ञानविरहात्प्रत्युतायोग्यताज्ञानस्य प्रतिबन्धकस्यैव जागरूकत्वाच्चेति ।

यदपि विशेषदर्शिनां बाधज्ञाने सत्यपि दोषवशाच्छङ्खः पीतो द्वौ चन्द्रावित्यादिज्ञानस्याहार्यज्ञानस्य चोदयानुरोधेन बाधनिश्चयप्रतिबध्यतावच्छेदककोटौ दोषविशेषजन्यत्वानाहार्यत्वयोरिव—

"अत्यन्तासत्यपि ज्ञानमर्थे शब्दः करोति हि ॥" इति न्यायेन "एष वन्ध्यासुतो याति शशशृङ्गधनुर्धरः॥
मृगतृष्णाम्भसि स्नातः खपुष्पकृतशेखरः ॥"

इत्यादिषु शाब्दबोधोदयानुरोधेन शाब्दान्यत्वस्यापि निवेश एवोचित इति— तदप्यसिद्धेनैवासिद्धस्य साधनम्। "एष वन्ध्यासुतः" इत्यादेरयोग्यपदसमभिव्याहाररूपतया किञ्चिदर्थबोधकत्वस्यैवासिद्धेस्तस्य शाब्दान्यत्वनिवेशावष्टम्भकत्वायोगात्॥ तथा चोक्तं सर्वार्थसिद्धौ—

"सत्त्वासत्त्वद्वयाख्यद्वयविरहचतुष्कोटिमुक्तं च तत्त्वं व्याघाताद्यैर्विधूतं न यदि तव कथं सप्तभङ्गीनिषेधः ॥
तुच्छालीकादिशब्दाः क्व चन सति परं क्वाप्यसत्त्वे प्रवृत्ता वन्ध्यापुत्रादिशब्दैर्भजति च समतां विध्यलीकादिवादः॥"

इति बुद्धिसरस्थपद्ये चतुर्थचरणविवरणावसरे "विध्यलीकशब्दो न किञ्चिदर्थं बोधयति। अयोग्यपदसमभिव्याहाररूपत्वात्। किञ्चिदिति हि विधिशब्दो बोधयेत्। न किञ्चिदिति चालीकशब्दः। तयोः कथं सामानाधिकरण्यसंभवः" इति॥

यत्पुनः समनन्तरमेव "यद्यपि-अत्यन्तासत्यपि ज्ञानमर्थे

शब्दःकरोति हि।तथापि वन्ध्यासुतशब्दार्थवद्विध्यलीकशब्दार्थस्याप्रसिद्धेर्विवक्षितासिद्धिः"इत्येवं सर्वार्थसिद्धावुच्यते—

तस्य त्वयं भावः॥यदापि "अत्यन्तासत्यपि" इत्यादिखण्डनकारमतमाश्रीयते-तदापि वन्ध्यासुतादिपदार्थानां विशिष्टानामसिद्धिरिति ॥ अत एवाग्रे तत्रैव व्यावहारिकसत्त्वनिरसनावसरे—"अथ शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः इति न्यायाद्व्यवहारजन्यविकल्पकल्पितं व्यावहारिकसत्यमिति मन्वीथाः ॥ तदपि न ॥ प्रत्यक्षानुमानवेद्यस्य प्रपञ्चस्य शब्दकल्पितत्त्वाभावात् ॥ यत्र तु शशशृङ्गादौ शब्दकल्पितत्वं कथञ्चिदभ्युपगम्येत-तत्रैव व्यावहारिकसत्यत्वं स्यान्न तु प्रत्यक्षादिसिद्धेष्विति नेष्टविपरीतापत्तिः" इत्येवमुक्तिरपि शशशृङ्गादेः शब्दकल्पितत्वे पराभ्युपगममनूद्यैव तदिष्टभङ्गप्रदर्शनपरा न तु स्वाभ्युपगमानुवादेनेति बोध्यम् ॥ अन्यथा श्रीभाष्यटीकादिषु बहुधा निराकृतस्यासत्ख्यातिवादस्य स्वीकारापत्तेः । अत्यन्तासतोभ्युपगमापत्तेश्च ॥ परिष्कृतं हि महता सन्दर्भेण शशविषाणखपुष्पादिपदानामत्यन्तासदर्थप्रत्यायकत्वं भट्टपादेन तत्सिद्धिसूत्र इति दिक् ॥

अथैवं सति शतदूषण्यां वाक्यस्यापि क्वचिदसत्यार्थप्रत्यायकत्वाभिधानं कथं घटताम् । तथा च शास्त्रप्रत्यक्षविरोधभङ्गे " किञ्चाभेदवासनाया दृष्टरूपेणादृष्टरूपेण वा तत्त्वमस्यादिवाक्यार्थज्ञानोपकारकत्वम् । नाद्यः । वाक्यार्थवासना-

मन्तरेणापि वाक्यस्य यथासंभवं सत्यासत्यस्वरूपस्वार्थबोकत्वस्य भवद्भिरपि स्वीकर्तव्यत्वात् ॥ उक्तं चाभियुक्तैः— अत्यन्तासत्यपि ज्ञानमर्थे शब्दः करोति हि ॥ इति ॥ अन्यथा क्वचिदप्यपरिचितवाक्यार्थप्रत्ययो न स्यात् । तथा सति गतं कवीनां प्रवीण्येन, भवतां च पूर्वपक्षार्थविज्ञानेन, श्रुतीनां चाप्राप्तार्थार्पणसामर्थ्येनेति "—

इति चेदुच्यते ॥ खण्डनकारादिमताभिप्रायेण हि वाक्यस्यासत्यार्थबोधकत्वमभिहितं तत्र। अत एव खण्डनकारवाक्यमेव तत्रोपष्टंभकतयोपदर्शितम् । अन्यथेत्यादेश्च वाक्यार्थवासनाया वाक्यार्थबुद्धिं प्रति कारणत्वाङ्गीकारे इत्येवार्थो न तु वाक्यस्य यथासंभवं सत्यासत्यार्थबोधकत्वानङ्गीकारे इति । अतो नान्यथेत्यादेरसङ्गतिः॥ वस्तुतस्तु बाधज्ञानविरहे सति योग्यताभ्रमेण शशविषाणादिपदघटितवाक्येन शाब्दबोधो भट्टकुमारिलादिसंम्मतः। यथोक्तं श्लोकवार्तिके चोदनासूत्रे—" अत्यन्तासत्यपि ज्ञानमर्थे शब्दः करोति हि ॥ तेनोत्सर्गे स्थिते तस्य दोषाभावात्प्रमाणता " इति । उदाहृतशतदूषणीसंदर्भेप्ययमेव श्लोकवार्तिकश्लोको विवक्षितः । अत एवाभियुक्तैरित्युक्तिरपि संगच्छते। चण्डमारुते तत्र " अत्र खण्डनसंमतिमाह । उक्तं चेति" इत्यवतारणं तु खण्डनश्लोकसारूप्यमात्रेण । "अत्यन्तासत्यपि ज्ञानमर्थे शब्दः करोति हि। अबाधात्तु प्रमामत्र स्वतः प्रा-

माण्यनिश्चलाम् " इत्यादिकोह्यद्वैतश्रुतिप्रामाण्यसमर्थनपरः खण्डनसंदर्भ इत्यवधेयम् ॥

इदमत्रावधेयम्—"एष वन्ध्यासुतो याति" इत्यादौ ह्यन्यथाख्यातिवादिनो भ्रान्तिरूपं शाब्दबोधमसति बाधज्ञाने योग्यताभ्रमात्सति च तस्मिन्दोषवशात्स्वीकुर्वन्ति ॥ अख्यातिवादिनस्तु तत्र शाब्दबोधोदयमनभ्युपगच्छन्तोऽसंसर्गाग्रहविशिष्टतत्तत्पदार्थोपस्थितिमात्राद्विशिष्टव्यवहारनिर्वाहमातिष्ठन्ते । स्पष्टं चेदं सर्वार्थसिद्धौ—

"प्रत्यक्षं संप्रयुक्ते स्मृतिरपि विदिते व्याप्तिसिद्धेनुमा स्याच्छाद्धी धीरन्वितादौ भवति तदनुगा भ्रान्तिधीः क्वाप्यसिद्धेः।
व्योमाम्भोजादिशब्दोप्यनियतमतिकृत्स्यात्पदार्थं त्यजेच्चेन्नो चेत्स्यादन्यथा धीर्ध्रुवमिह यदि वानन्वितत्वाप्रतीतिः॥"

इति पद्यव्याख्यायां बुद्धिसरे । तत्राद्यमते शाद्धबुद्धौ न योग्यताज्ञानस्य कारणत्वमङ्गीक्रियते । अयोग्यताज्ञानस्य दोषविशेषाजन्यतद्धत्ताबुद्धौ प्रतिबन्धकत्वाङ्गीकरात्॥"एष वन्ध्यासुतः" इत्यादौ क्वचिदाहार्ययोग्यताज्ञानबलाज्जायमानो बोधो दोषविशेषजन्यत्वान्न प्रतिबध्यते । यथोक्तं तत्रैव सर्वार्थसिद्धौ-"कथमत्रानन्वयग्रहेप्यन्वितभ्रम इति ।दोषमेव पृच्छ। किं न पश्यसि चन्द्रैकत्वं बुध्यमानोप्यङ्गुल्यवष्टम्भाच्चन्द्रे द्वित्वं निर्मुखमपि मुकुरमवधारयंस्तत्र मुखमिति " इति ॥ द्वितीयपक्षे तु शाब्दसामान्य एवानाहार्ययोग्यताज्ञानस्य

LIBRARY
ACADEMY OF SANSKRIT RESEARCH
MELKOTE-571 431

कारणत्वं स्वीक्रियते । अयमेव च पक्षः सांम्प्रदायिकः ॥ अ ख्यातिपक्षस्यैव सांम्प्रदायिकतायाः सर्वार्थसिद्धिन्यायपरिशु द्धचोर्व्यवस्थापनात्। स्पष्टं चेदमनन्ताचार्यविरचितज्ञानयाथा र्थ्यवादादावपीति ॥

अतोस्मत्सिद्धान्ते क्वापि योग्यताज्ञानं विना न शाब्दबो धः।तस्मान्मुखचन्द्रादिरूपकस्थले रूपकातिशयोक्तिस्थले च शाब्दबोधसिद्धयर्थं लक्षणैव समाश्रयणीया ॥

यत्तु रूपकादिस्थलेप्युपमानपदस्य तत्सदृशे लक्षणाङ्गीका रे उपमालङ्कारस्यैव संभवेन रूपकरूपकातिशयोक्त्योर्मूलत एवोच्छेदप्रसङ्ग इति–

तदविवेकविलसितम् ॥ उपमानपदेन गौणवृत्त्योपमेय विवक्षायामप्युपमेयस्यापि पृथगुपादाने रूपकं तदनुपादाने रूपकातिशयोक्तिः, उपमानपदस्योपमेये गौणवृत्तिविरहे उ पमा–, इत्येवं रूपकादीनां त्रयाणामप्यलङ्काराणां विविक्त विषयतया मूलोच्छेदासंभवात् ॥

यदपि–तादृप्यरूपकस्थले रूपकातिशयोक्तिस्थले च भ्रमात्मकशक्तिज्ञानादेव चन्द्रादिपदेन चन्द्रत्वादिना मुखादे रुपस्थितिशाब्दबोधौ घटादिपदेनेव पटादेरिति–

तदतितुच्छम् ॥ तथा सत्यभ्रान्तानां सहृदयाणां विदुषां रूपकादिपरवाक्याच्छाब्दानापत्तेः ॥

ACADEMY OF SANSKRIT RESEARCH
MELKOTE LIBRARY
Acc. No. 5709

यदपि मुखचन्द्र इत्यादावुपमितसमासेन रूपकाङ्गीकारे समासे विषयिप्राधान्यं न स्यादिति—तदपीष्टापत्त्यैव परिहृतम् ॥ प्रत्युत मुखं चन्द्र इत्यादौ व्यासे विषयप्राधान्यस्यैव सर्वसंमततया समासेपि तदङ्गीकारेऽत्यन्तानुगुण्यस्यैव संपत्तेर्विषयिप्राधान्यस्यैव व्यासवैरूप्यावहतयाऽनादरणीयत्वात् ॥

" मीनवती नयनाभ्यां करचरणाभ्यां प्रफुल्लकमलवती ॥
शैवालिनी च केशैः सुरसेयं सुन्दरी सरसी ॥ "

इत्यादिरसगङ्गाधराद्युदाहृतपद्ये त्वगत्या विषयिप्राधन्ये सत्यपि तृतीयया प्रतियोगित्वमुखस्याभेदस्य भानाङ्गीकारान्नयननिष्ठाभेदप्रतियोगिमीनवतीत्याद्यर्थाद्रूपकोपपत्तिः ॥ नैतावता मुखचन्द्र इत्यादिसमासेपि विषयिप्राधान्यमाश्रयणीयमित्यस्ति निर्बन्धः ॥

यत्तु—'मुखं चन्द्रस्तेऽयं शिशिरमृदुलालोकमहसा
सुधादायी लोकं विगलदशनायं कलयति ॥
दरं दृष्टः सद्यः कलयति च कान्तेतिविपुलं
समन्तादुद्वेलं मम कुतुकपाथोनिधिमपि ॥'

इत्यत्र सुधादायीत्यादिपुच्छिङ्गविशेषणानुरोधाद्विषयिणश्चन्द्रस्यैव प्राधान्यमावश्यकमिति—

तदत्यन्तमसत् ॥ रूपकेविषयिप्राधान्यवादिभिरपि समासस्थल एव तदङ्गीकारात् ॥ स्वेनापि "समासस्थले विषयिप्रधान एव च बोध इत्यनङ्गीकारे" इत्येवानुवादात् ॥ अन्यथा

"सुविमलमौक्तिकतारे धवलांशुकचन्द्रिकाचमत्कारे ॥
वदनपरिपूर्णचन्द्रे सुन्दरि राकासि नात्र सन्देहः ॥"
" चन्द्रज्योत्स्नाविशदपुलिने सैकतेस्मिन्सरय्वा
वाद्द्यूतं चिरतरमभूत्सिद्धयूनोः कयोश्चित् ॥
एको वक्ति प्रथमनिहतं कैटभं कंसमन्यः
स त्वं तत्त्वं कथय भगवन्को हतस्तत्र पूर्वम् ॥"

इत्यादौ व्यासेपि विषयिप्राधान्याङ्गीकारे मध्यमपुरुषासाधुत्वापत्तेः।समासे रूपकस्यानुवाद्यता व्यासे तु विधेयतेति वैलक्षण्योक्तेरसगङ्गाधरादिग्रन्थसंमताया भङ्गप्रसङ्गाच्च ॥

न च परिणामप्रकरणे रूपकपरिणामयोरभेदस्य समासे प्रतियोगित्वानुयोगित्वमुखकृतं बोधवैलक्षण्यमभिधाय"एवं च

"वदनेनेन्दुना तन्वी स्मरतापं विलुम्पति ॥
वदेनेन्दुना तन्वी शिशिरी कुरुते दृशौ ॥"

इति व्यस्तरूपके च बोधवैलक्षण्यम्" इति रसगङ्गाधर एवोक्तेर्व्यासेपि विषयिप्राधान्यं तदभिमतमिति भ्रमितव्यम् ॥

तत्रापि व्यासे रूपकपरिणामयोर्विषयविषयिप्राधान्याभ्यामेव बोधभेदस्याभिमतत्वात्।अन्यथा रूपके व्यासे विषयप्राधान्यप्रतिपादनपरतदीयपूर्वग्रन्थविरोधप्रसङ्गात् ॥ तस्मादुदाहृतश्लोके विषयिप्राधान्याश्रयणं तदनुरोधेन विशेषणनिबन्धनमुपमानोपमेययोर्लिङ्गभेदकरणं च कवेरनवहिततामेवावगमयति ॥ अत एव—

"बुद्धिरर्चिर्महीपाल यशस्ते सुरनिम्नगा ।
कृतयस्तु शरत्कालचारुचन्दिरचन्द्रिका ॥

अत्र विषयविषयिणोर्लिङ्गादिकृतं वैलक्षण्यं तयोस्ताद्रूप्यबुद्धौ प्रतिकूलम् " इत्युक्त्वा "क्वचित्कविसमयसिद्धतया चमत्कारहानिराहित्ये तु नामी दोषाः । यथा'सन्तापशान्तिकारित्वाद्वदनं तव चन्द्रमाः ॥' इत्यादौ हेतुरूपके" इत्यनेन हेतुरूपकमेव लिङ्गभेददोषस्य प्रत्युदाहरणं प्रदर्शितम् । तस्माद्व्यस्तरूपके विषयविषयिणोर्लिङ्गभेदे विषयिमात्रसमानाधिकरणविशेषणोपादानं दोष एवेति ध्येयम् ॥ यदि पुनरेतद्दोषपरिजिहिर्षयोदाहृतपद्येऽयमित्यस्याध्याहृतयत्पदप्रतिसम्बन्धितां स्वीकृत्य यः शिशिरमृदुलालोकमहसा सुधादायी सन् लोकं विगलदशनायं कलयति यश्च दरं दृष्टः सन् कुतुकपाथोनिधिमुद्वेलं कलयति तथाविधश्चन्द्रस्ते मुखमित्यन्वयः स्वीक्रियते तदा तत्र विषये मुखे तथाविधचन्द्राभेदस्यैव विधानसंभवाद्विषयस्यैव प्राधान्यमत्राभ्याहतमिति विषयिप्राधान्यसाधनाय तत्पद्योदाहरणमसमञ्जसमेवेत्यवधेयम् ॥

यदपि समस्तरूपके उपमितसमासाङ्गीकारे आह्लादकं सुन्दरं च तव मुखं पश्यन्नहं तृप्यामीत्यादिप्रयोगानुपपत्तिः ॥ सामान्यप्रयोगेणोपमितसमासासंभवादिति ॥

तन्न॥उपात्तधर्मातिरिक्तधर्मेण सादृश्यविवक्षायामेव तत्प्रयोगस्य साधुत्वाश्रयणात् ॥ अन्यथा तु तस्यासाधुताया ए-

वाङ्गीकारात्। स्पष्टं चेदं प्रागुदाहततत्त्वटीकासंदर्भे। इत्थमेव हि "राजते राजकुञ्जरः" इत्यादौ द्विलुप्तायां समासगायां राजतेरुपादानेपि तदन्यसाधर्म्यमादायैव सङ्गतिः प्रदर्शिता निबन्धकारैः—

एतेन "अनुपात्तधर्मेण साम्यविवक्षया धर्मोपादनस्थलेपि समासोपपादनमसत्। धर्मोपादनवैफल्यापत्तेः। उपात्तधर्मसत्त्वे तेनैव साम्यप्रतीतेरनुभवात्। सकलकलः पुरचन्द्रो राजते इत्यादावुपात्तधर्मातिरिक्तधर्मस्य साम्यप्रयोजकस्याभावाच्च" इति शेखरकारोक्तमपास्तम्॥ अनुपात्तविवक्षितधर्मपरिपोषकतयैव तत्तद्धर्मोपादानसाफल्यात्। उपात्तधर्मेणैव सादृश्यमित्यनुभवस्य "राजते राजकुञ्जरः" इत्याद्युदाहरणपरकाव्यप्रकाशादिमहानिबन्धविरुद्धत्वात् "सकलकलः" इत्यादावपि ह्रद्यत्वादेरेव साधर्म्यस्योपमाप्रयोजकत्वेन विवक्षितत्वसंभवस्य तत्त्वटीकादिमहानिबन्धसंमतत्वाच्चेति॥

तस्मात् मुखचन्द्रादिपदानां मयूरव्यंसकादिगणे विना प्रमाणं पाठकल्पनापेक्षयोक्तरीत्योपमितसमासाश्रयणमेव तु युक्तम्।

यद्यपि मयूरव्यंसकादिसमासाश्रयणे उपात्तधर्मेणाप्युपमा संभवतीति लक्ष्यकृतं स्वारस्यमस्ति॥ तथापि तत्पक्षे मयूरव्यंसकादिगणे तादृशशब्दानां पाठस्य कल्पनीयतयाऽनुशासनकृतमस्वारस्यं दुर्वारमेव। लक्षणकृतास्वारस्यादपि लक्ष्यकृतास्वारस्यस्वीकरणमेव ज्याय इति तु पर्यालोच्य

सरस्वतीकण्ठाभरणकारादिभिराचार्यैश्चोपमितसमासपक्ष एव रूपकस्थले समाश्रितः॥यद्यपि मुखचन्द्र इत्यादौ "विशेषणं विशेष्येण बहुलम्" इति विशेषणसमासमङ्गीकृत्य रूपकमाद्रियते रसगङ्गाधरकृता।तत्र च गणपाठकल्पनादिकृतमस्वारस्यं नास्त्येव॥ तथापि तन्मते चन्द्रपदस्य पूर्वनिपातविरहो बहुलग्रहणेनैव संपादनीय इतीदमेवास्वारस्यं दुर्वारमिति प्राचामाचार्याणां चाशयो बोध्य इति दिक् ॥

अथैवमपि वचस्सुधामित्यत्रोपमितसमासकथनं न सङ्गच्छत एव।उपमितमिति सूत्रे उपमानोपमेयवाचकपदयोः समानलिङ्गकत्व एवोपमितसमासप्रवृत्तेः शेखरकृता स्थापितत्वात्॥तथा च तद्ग्रन्थः-"एतच्चोपमितमित्येतत्स्वारस्यात्तस्योपमानेन नित्यसाकाङ्क्षत्वाच्च व्याघ्रादीनामुपमानत्व एवोभयोः समानलिङ्गकत्व एव च प्रवर्तते॥अत एव परवल्लिङ्गमिति सूत्रे द्वन्द्वैकदेशिनोरिति न्यासं कृत्वा तत्पुरुषग्रहणं प्रत्याख्यातम्। अन्यथाऽस्य पूर्वपदार्थप्रधानस्य भाष्यब्धिरित्यादौ दृश्यमानपरवल्लिङ्गस्य सिद्ध्यर्थं तत्पुरुषग्रहणावश्यकत्वेन तदसङ्गतिः स्पष्टैव। "भाष्याब्धिः क्रातिगम्भीरः" इत्यादौ सामान्यधर्मप्रयोगेपि लिङ्गभेदेपि मयूरव्यंसकादित्वात्सिद्धम्" इति ॥ इति चेदत्रोच्यते ॥ परवल्लिङ्गमिति सूत्रे तत्पुरुषग्रहणप्रत्याख्यानपरभाष्यप्रामाण्यादुपमितसमासस्योपमेयोपमानयोः समानलिङ्गतास्थल एव प्रवृत्तिकल्पने व्याघ्रादेराकृति-

गणत्वेन करकिसलयमित्यादिसिद्धिप्रतिपादनपरवृत्त्यादिग्रन्थासङ्गतिप्रसङ्गः।एवं पाणिपद्मानीत्यादावुपमितसमासप्रदर्शनपरसरस्वतीकण्ठाभरणग्रन्थस्य "पादाम्बुजं भवतु वो विजयाय मञ्जुमञ्जीरशिञ्जितमनोहरमम्बिकायाः" इत्यत्र पादाम्बुजशब्दे उपमितसमासप्रवृत्तितात्पर्यकस्य संसृष्टिप्रकरणस्थकाव्यप्रकाशग्रन्थस्य तत्रैव पद्ये उपमारूपकयोः सन्देहसङ्करप्रतिपादनपरस्य परिणामप्रकरणस्थरसगङ्गाधरग्रन्थव्याख्यागतस्य परे त्वित्यादिशेखरकारग्रन्थस्यैव चासङ्गतिप्रसङ्गः ॥

किञ्च लिङ्गभेदे भाष्याब्धिरित्यादौ पूर्वपदार्थप्रधानः समासो मयूरव्यंसकादितया हि स्वीकृतः शेखरकृता । तत्रैव परवल्लिङ्गतायाः कथमुपपत्तिः ॥ परवल्लिङ्गमिति सूत्रेण तदुपपादने तु तत्पुरुषग्रहणप्रत्याख्यानपरभाष्यासङ्गतिः ॥

ननु तत्र लोकादेव मयूरव्यंसकादिगणपाठादेव वा परवल्लिङ्गतेति चेत्—एवं सत्युपमितसमासेपि लोकादेव परवल्लिङ्गता किमिति नाभ्युपगम्यते ॥

एवं मयूरव्यंसकादिगणे लिङ्गविशिष्टानामेव भाष्याब्धिरित्येवमादीनां पाठकल्पनया तत्पाठेन निपातनादेव परवल्लिङ्गतासिद्धिस्वीकारे व्याघ्रादिगणेपि लिङ्गविशिष्टानामेव व्याघ्रकिसलयाम्बुजादिपदानां पाठकल्पनया लिङ्गविशिष्टपाठस्य समासे लिङ्गान्तरप्राप्तिबाधनार्थकतयैव च परवल्लिङ्ग-

तोपपत्तेर्विभिन्नलिङ्गस्थलेप्युपमितसमासप्रवृत्तिरेव किं नेष्यते ॥ उपमेयोपमानावयवकसमासानां लिङ्गसहितानां मयूरव्यंसकादिगणे पाठकल्पनापेक्षयोपमानवाचकपदानामेव लिङ्गविशिष्टानां व्याघ्रादिगणे पाठकल्पने लाघवस्य विनिगमकस्य सद्भावादिति ॥

एवमुपमितसमासस्य समानलिङ्गतास्थल एव प्रवृत्तिकल्पनायामपि ॥

"अर्थप्राणेषु रमते व्यर्थमेष विमूढधीः ।
मुनिस्त्वाश्रमदारेषु मोदते निष्परिग्रहः ॥"

इत्यादावर्थप्राणाश्रमदारादिपदेषु समानलिङ्गतास्थले उपमितसमासप्रवृत्तेरव्याहततया तत्र प्रधानभूतपूर्वपदार्थगतसङ्ख्यानुसारेणैव वचनापत्त्या परवद्वचनानुपपत्तिः । अतोत्र परवद्वचनोपपत्तये उपदर्शितवृत्त्यादिग्रन्थसङ्गतये चान्यथैव कल्पनीयम् ॥

यथा—उपमितसूत्रे उपमानैरिति सामान्येनैव निर्देशे कर्तव्ये व्याघ्रादिभिरित्येवं—

"स्वार्थो द्रव्यं च लिङ्गं च संख्या कारकमेव च ॥
अमी पञ्चैव नामार्थास्त्रयः केषाञ्चिदग्रिमाः ॥"

इत्युक्तदिशा विशिष्य लिङ्गसंख्यादिपरप्रातिपदिकग्रहणमुपमानवाचिपदस्योपसर्जनस्याप्यत्र समासे स्वस्वलिङ्ग-

सङ्ख्यानतिवर्तितां ज्ञापयितुम् । अतः करकिसलयं, पादाम्बुजं, पाणिपद्मं, वचस्सुधा, अर्थप्राणाः, आश्रमदाराः, इत्यादावुपमितसमासोपपत्त्या काशिकावृत्तिसरस्वतीकण्ठाभरणादिग्रन्थसङ्गतिः। सङ्गच्छते चैवं सति परवल्लिङ्गसूत्रे भाष्ये तत्पुरुषोदाहरणावसरे एकदेशिसमासमात्रोदाहरणं तत्पुरुषग्रहणप्रत्याख्यानं च। उपमितसमासे परवल्लिङ्गतायाः परवत्सङ्ख्याया इवोपदर्शितरीत्या ज्ञापकबलसिद्धतया परवल्लिङ्गसूत्रविषयताविरहात् ॥

अन्यथा विभिन्नवचनकयोरुपमेयोपमानवाचकयोर्मयूरव्यंसकादिसमासे परवद्वचनतायाइशेखरकृन्मतेपि दुरुपपादत्वात् ॥न च तथाविधयोस्तयोर्मयूरव्यंसकादिसमास एवाप्रामाणिक इति वाच्यम् ॥ प्रामाणिकत्वेपि संभवत्पक्षस्यैवाश्रयितुमुचितत्वात् । परिभाषा एवेन्दुरर्थप्रकाशकत्वाच्छेखरे यस्येति ग्रन्थपक्षे इत्येवं भैरवमिश्रादिकृतपरिभाषेन्दुशेखरव्याख्यासन्दर्भ एव तत्प्रामाणिकतावधारणात् । तदेवं सर्वसामञ्जस्ये सति तद्विपरीता शब्देन्दुशेखरकारीया कल्पनाऽनादरणीयैव । अनादृतैव च सा शेखरव्याख्याकारैरेव महावैयाकरणैः परिभाषेन्दुशेखरमंगलपद्यविवरणावसरे यथा—इन्दुरिव विधिशास्त्रीयवाक्यार्थं प्रतिपादयन्त्यो याः परिभाषास्ताइशेखरःव्याख्येयत्वाच्छिरोभूषणं यस्येति वाक्यार्थचन्द्रिकायाम्। इन्दुरिव परिभाषा शेखरो भूषणं यस्येति सर्व-

मङ्गलायाम्। अत एव विभिन्नलिङ्गकयोरिव विभिन्नवचनकयो रप्युपमितसमासो वैयाकरणनिबन्धसिद्ध एवेति ध्येयमि त्यलं पल्लवितेन ॥

अथास्तु शेखरकारमतमेवमनुपपन्नम् । तथापि मुखचन्द्र इत्यादौ विभिन्नलिङ्गकस्थले उत्तरपदार्थप्रधान एव समासो रूपकौपयिको मयूरव्यंसकादिगणपाठेन स्वीक्रियत इति कुवलयानन्दादिकृतामालङ्कारिकाणां मतमेव तु युक्त-मुत्पश्यामः । तत्र हि "यो ह्युत्तरपदार्थप्रधानस्तस्य दैवकृतं परवल्लिङ्गम्" इति महाभाष्योक्तेः अयत्नलभ्यैव परवल्लिङ्ग-ता परवद्वचनता च इति तत्पुरुषग्रहणप्रत्याख्यानपरभाष्य-विरोधाप्रसक्तेर्न किञ्चित्कल्पनागौरवम् । तत्रोपमितसमा-सस्य पूर्वपदार्थप्रधानस्य स्वीकारे त्वाचार्याभिमते तद्भाष्य-विरोधपरिहारार्थं लिङ्गविशिष्टानां व्याघ्रादिपदानां पाठकल्प-नया वा व्याघ्रादिप्रातिपदिकविशेषोपादानबलेन वा समासे उपमानपदानां स्वस्वलिङ्गानतिवर्तिता कल्पनीयेति गौरवं दुर्वारमिति चेत् ॥ न ॥ उदाहृतवृत्तिग्रन्थाद्यविरोधानुसारेण गौरवस्य प्रामाणिकतया दोषानाधायकत्वात् ॥

किञ्च गणेऽग्राहृष्टजातीयानां समासरूपाणां बहूनां शब्दानां मयूरव्यंसकादिगणे पाठकल्पन एव महद्गौरवम् । अतो व्याघ्रादिगणे एव दृष्टजातीयानामुपमानपरपदानां लघुभूतानां पाठकल्पनया विशेषमात्रोपादानबलाश्रयणेन वोक्तविधकल्पनमेव लघीयः ॥ अत एव कुवलयानन्दकारा-

दिभिरपि मुखचन्द्र इत्यादावुपमितसमासोप्यङ्गीक्रियते ॥ तस्माद्विभिन्नलिङ्गकस्थलेप्युपमितसमासस्सर्वालङ्कारिकसम्मतः । परं तु नवीनैर्मयूरव्यंसकादिसमासोपि सति तात्पर्ये स्वीक्रियते । प्राच्यैस्सरस्वतीकण्ठाभरणकारादिभिस्तु केवलमुपमितसमास एवोपमेयोपमनवाचकपदावयवकस्समासोऽनुशासनस्वारस्यादिति सुधियो विदाङ्कुर्वन्तु ।

तथा चोपदर्शितसरस्वतीकण्ठाभरणादिनिबन्धनानुरोधिनी श्रुतप्रकाशिकाचार्याणामुपमितसमासे रूपकालङ्कारोक्तिर्न मात्रयापि दुष्यति । श्रुतदीपिकायामपि समासान्तराप्रदर्शनाच्छ्रुतप्रकाशिकाप्रदर्शित उपमितसमास एवाभिसंहित इति श्रुतदीपिकाश्रुतप्रकाशिकयोरैककण्ठ्यमेवाधुना समञ्जनीत्यपरमप्यनुकूलम् ॥

एतेन व्यासार्याणां ग्रन्थद्वयेपि वच एव सुधेति मयूरव्यंसकादिसमास एव विवक्षित इति वचःपदस्यार्थपरतायास्तैरुक्तेरिति कस्यचिदुक्तिरसमञ्जसेति व्यक्तीकृतम् । वचःपदस्यार्थपरत्वोक्तेस्तात्पर्यं त्वन्यदेवेति वक्ष्यते ॥ न चैवमुभयत्र ग्रन्थे रूपकालङ्कारस्यैव विवक्षितत्वेऽमृतत्वहेतुत्वभोग्यत्वरूपधर्मभेदकथनं न युज्यते इति वाच्यम् ॥ अमृतत्वहेतुत्वात्सुधात्वरूपणामिति श्रुतदीपिकाग्रन्थो हि भक्तिशास्त्ररूपस्य पाराशर्यवचसस्साधनभक्तिप्रकाशकतयाऽमृतत्वशब्दितमुक्तिहेतुत्वाभिप्रायेण प्रवृत्तः ॥ तत्र चामृतत्वहे-

तुतया पेयत्वोक्तावमृतत्वहेतुभक्तिकामानामेव प्रवृत्तिः स्यान्न पुनः प्रपन्नानामपीत्यस्वरसाद्भक्तमात्राधिकारिकत्वप्रसङ्गरूपाच्छ्रुतप्रकाशिकायां "सुधाशब्देन भोग्यत्वमभिप्रेत०" इत्यन्वयग्राहि ॥ तत्र च–

"सन्तोषार्थं विमृशति मुहुस्सद्भिरध्यात्मविद्यां
नित्यं ब्रूते निशमयति च स्वादुसुव्याहृतानि ।
अङ्गीकुर्वन्ननवललितां वृत्तिमादेहपाता-
दृष्टादृष्टस्वभरविगमे दत्तदृष्टिः प्रपन्नः ॥"

इत्याद्युक्तदिशाऽध्यात्मशास्त्रे प्रपन्नभोग्यतायामविवादाद्भक्तप्रपन्नसाधारण्यं भक्तिशास्त्रस्यापि पाराशर्यवचस्स्विसिध्यतीति सर्वसामञ्जस्यम् ॥

अथैवमपि षष्ठीसमासखण्डनं व्यासार्याणां न युज्यते तत्र सुधाशब्दस्यार्थे लक्षणायामपि वचश्शब्दस्यार्थपर्यन्ततया लाक्षिणकताया उपमितसमासपक्षेप्यविशिष्टत्वात् । उक्तं हि–"वचश्शब्दस्यार्थे तात्पर्यम्" इति श्रुतप्रकाशिकायां । वचस्सुधेति षष्ठीसमासे तु वचश्शब्दो यथाश्रुततयैव सङ्गच्छते । अर्थस्य सुधापदेनैव प्रत्यायनात् ॥ न चैवमप्युपमितसमासपक्षे वचश्शब्दलक्षणा, षष्ठीसमासपक्षे सुधाशब्दलक्षणेति साम्यमास्ताम् । तथापि रूपकप्रकरणभङ्ग एव दोषष्षष्ठीसमासपक्षे दुरुद्धर इति तत्समासखण्डनं व्यासार्याणां युज्यत एवेति वाच्यम् ॥ एवं सति सुधाशब्दलक्षणाभयाश्चेत्युक्तेरतितुच्छत्वापत्तेः । एवं सुधाशब्दे रूपकाति-

शयोक्तिस्वीकारेपि तस्योत्तरविशेषणावधृतरूपकानुप्राणितत्वसम्भवेन कथञ्चिद्रूपकप्रकरणानुगुण्यस्यापि सम्भवाच्च ॥ प्रत्युत मुख्ये वचश्शब्दे लक्षणास्वीकारापेक्षया सुधाशब्द एव जघन्ये लक्षणास्वीकारस्योचिततया षष्ठीसमास एव युक्तस्स्वीकर्तुम्। मीमांसितं हि पूर्वतन्त्रे-"धेनुर्दक्षिणा" इत्यादौ प्रथमश्रुतधेनुपदलक्षणास्वीकारादपि चरमश्रुतदक्षिणापदलक्षणास्वीकारस्यैव ज्यायस्त्वमिति चेत्--

अत्र कश्चित्--वचश्शब्दस्यार्थे तात्पर्यमित्यस्यार्थे लक्षणेति नार्थः । किन्तु व्युत्पन्नानामर्थाभिधायकशब्दानुभवे ह्यर्थानुभवोपि नान्तरीयक एवेत्यर्थेपि सुधात्वेन पेयत्वसिद्धिर्निराबाधैवेतीत्याह ॥

तदिदं लोकोत्तरव्युत्पत्तिविलसितम् ॥ उक्तवाक्याद्धवदुक्तार्थस्य कथमप्यप्रतीतेः । गङ्गापदस्य तीरे तात्पर्यमित्यादिवाक्याद्धि गङ्गापदं तीरपरमित्येतावत्प्रतीयते-तथेह वचश्शब्दोर्थपर इत्येव प्रतीयते ॥ किञ्च वचसस्सुधात्वेन पेयत्वेऽभिहितेशब्दानुभवे आनुषङ्गिकतयाऽर्थस्य भानेपि कथं तत्र सुधात्वेन पेयत्वं सिध्येत् । शाब्दस्याशाब्देनान्वयायोगात् ॥

यदपि--यद्वा वचश्शब्दस्यार्थाभिधायकशब्दवाचिनो बोधकतासम्बन्धेनार्थविशिष्टशब्दपरतया विशिष्टस्यान्वये तात्पर्ये सति 'सपरिकरस्य राज्ञो दर्शनमासीत्' इत्यादौ विशेषणस्य परिकरस्यापि दर्शनेऽन्वयवद्विशेषणभूतस्यार्थस्यापीह सुधात्वरूपणेऽन्वयसम्भवो निराबाध एवेति ॥

तदप्यसत् ॥ वचेरसुना निष्पन्नस्य वचश्शब्दस्योच्चारण-क्रियाकर्मत्वावच्छिन्नवाचकतया बोधकतासम्बन्धेनार्थाविशिष्टपरत्वे लक्षणाप्रसङ्गस्य दुर्वारत्वात् ।'अनर्थकं वचः' इत्यादौ निरर्थकवाक्येपि वचश्शब्दप्रयोगात् । अत एव न्यायपरिशुद्धौ "वाक्यं द्विविधं–पौरूषेयापौरुषेयभेदात् । पुरुषस्वातन्त्र्याधीनरचनाविशेषविशिष्टं पौरुषेयम् । तद्विधा-अन्वितार्थमनन्वितार्थं च । आद्यं यथा-अग्निरुष्ण आपो द्रवा इति । द्वितीयं यथा अग्नि-रनुष्ण आपः कठिना इति " इति ॥

न चैवं सत्यत्र " अर्थाभिधायकं हि वाक्यम् " इति टीकोक्तेः कथं सङ्गतिरिति वाच्यम् ॥ न ह्यत्र वाक्यत्वावच्छेदेनार्थाभिधायकत्वं विवक्षितमपि तु तत्सामानाधिकरण्येनैव । तदपि च वाक्यार्थयोरभिधायकाभिधेयभावरूपस्य लक्षणौपयिकस्य प्रतिपादनायैवेत्यवधार्यताम् । अथ वा–वाक्यत्वं शब्दार्थोभयपर्याप्तं काव्यत्वादिवत् । तथा च वाक्यवाचिना वचःपदेन शक्त्यैवार्थः प्रतिपाद्यत इति न तत्र लक्षणाश्रयणमावश्यकमिति केषाञ्चिदाक्षेपं परिहर्तुमर्थाभिधायकमिति ग्रन्थः प्रवृत्तः । अयं हि तस्याशयः–अयमर्थ एतद्वाक्यमिति सामानाधिकरण्येन व्यवहारः प्रसज्येत यद्यर्थो वाक्यं स्यात् । अतोस्य वाक्यस्यायमर्थ इत्यादिप्रयोगादर्थस्याभिधायकमेव वाक्यमिति प्रतीयते । तस्माद्वाक्यत्वं शब्दमात्रपर्याप्तम् । काव्यत्वादिकमपि शब्दमात्रपर्याप्तं न तु

शब्दार्थयोरुभयत्र, काव्यं श्रुतमर्थो न ज्ञात इत्यादिव्यवहारादिति ॥ अधिकं रसगङ्गाधरे तद्विवरणे चास्मत्कृते वेदितव्यम्। तस्माद्वचश्शब्दस्यार्थे लक्षणैव स्वीकार्या। अतएव तत्त्वटीकायां "रूपकप्रेकरणानुगुण्येन वा वचश्शब्दलक्षितस्तदर्थस्सुधात्वेन रूप्यते" इत्यनेन वचश्शब्दलक्षणा स्पष्टं प्रतिपादिता ॥

यदपि– "उपनिषद्दुग्धाब्धिमध्योद्धृताम्" इति विशेषणव्याख्यावसरे बादरायणसूत्राणामुपनिषन्मूलत्वकथनेनेत्यनेन वचश्शब्दमुख्यार्थाप्रहाणस्यैव स्वपक्षाभिमतता व्यासार्यैः सूचिता–इति ॥

तदप्यसत् ॥ वचःपदस्य वचःप्रतिपाद्यत्वविशिष्टार्थलाक्षणिकतायामपि बादरायणसूत्रप्रतिपाद्यत्वविशिष्टेऽर्थे उपनिषद्दुग्धाब्धिमध्योद्धृतत्वे सर्वैककण्ठ्येनोपनिषत्प्रमितत्वरूपे कथिते तुल्यवित्तिवेद्यतया बादरायणसूत्राणां तादृशोपनिषत्प्रमितार्थप्रतिपादकत्वरूपस्योपनिषन्मूलत्वस्य लाभात्तथोक्त्युपपत्तेः। बादरायणसूत्रेषूपनिषन्मूलत्वस्यार्थमद्धारीकृत्य दुर्वचत्वात् ॥

यदपि–वचश्शब्दस्य लक्षणयाऽर्थमात्रपरत्वस्य व्यासार्याभिमतत्वे श्रुतप्रकाशिकायां वचश्शब्दस्यार्थे तात्पर्यमित्युक्त्वा यथा वेदविच्छास्त्रविदित्यादिदृष्टान्तप्रदर्शनासङ्गतिः। दृष्टान्ततया प्रदर्शितवेदादिशब्दा हि सार्थकवेदादिपराः ॥

अन्यथा वेदादिवाक्यप्रतिपन्नयत्किञ्चिदर्थमात्रविद्यत्रैवर्णिकेपि वेदविच्छास्त्रविदित्यादिप्रयोगापत्तेर्दुर्वारत्वात् इति–

तदप्यसत् ॥ वेदादिपदानां शक्यतावच्छेदककोटौ सार्थकत्वनिवेशे मानाभावात् । सार्थकवेदत्वावच्छिन्नपरत्वे लक्षणाप्रसङ्गात् । अन्यथा "न स्त्री शूद्रौ वेदमधीयाताम्" इत्यादावर्थसहितवेदाध्ययनस्यैव निषेधप्रसक्तौ केवलवेदाध्ययने स्त्रीशूद्रयोर्निषेधविरहप्रसङ्गात् । तस्माद्वेदविदित्यादौ वेदादिपदानां वेदप्रतिपाद्यत्वविशिष्टार्थपरतैव । विशिष्टस्य वेदनेऽन्वये विशेषणस्यान्वयो विशिष्टान्वयस्थलीयव्युत्पत्तिसिद्ध इति वेदादिवाक्यप्रतिपन्नयात्किञ्चिदर्थमात्रविद्यत्रैवर्णिके वेदविच्छास्त्रविदित्यादिप्रयोगवारणं बोध्यम् ॥

तथा चोपदर्शितदृष्टान्तानुरोधादपि वचश्शब्दस्य वचःप्रतिपाद्यत्वविशिष्टार्थलाक्षणिकतैव श्रुतप्रकाशिकायां व्यासार्याभिमतेत्यवधार्यते । श्रुतदीपिकाग्रन्थेपि वचश्शब्दोऽर्थपर्यन्त इति सूक्त्या स्पष्टमिदम् ॥

यत्तु–श्रुतदीपिकाग्रन्थोपि वचश्शब्दोऽर्थान्तर्भावेन शब्दपरो न तु केवलशब्दपर इत्येतत्परः । ततश्च पूर्वोक्तरीत्या वचश्शब्दस्य स्ववोधकत्वसम्बन्धेनार्थविशिष्टशब्दपरतैव सिध्यतीति न लक्षणाप्रसङ्ग इति–तदपि भ्रान्तिविलसितमिति प्रागेव व्यक्तीकृतम् । वचश्शब्दस्योच्चारणक्रियाकर्ममात्रवाचकतया बोधकतासम्बन्धेनार्थवैशिष्ट्यावच्छिन्नत्वस्य विना

लक्षणामलाभात्। इत्थं चोपमितसमासपक्षे प्रथमश्रुते वचश्शब्द एव लक्षणामाश्रितवद्भिः श्रुतप्रकाशिकाचार्यैरनन्तरश्रुतसुधाशब्दलक्षणाभयेन कृतं षष्ठीसमासखण्डनं न रोचते विदुषाम्॥

इति चेदत्रोच्यते॥ वचश्शब्दस्य वचःप्रतिपाद्यत्वविशिष्टे लक्षणा हि निरूढलक्षणारूपा शक्तितुल्या आनुशासनिकलक्षणासमशीलैवेति न दूहषणावहा। अत एव वचश्शब्दस्यार्थे तात्पर्यमित्यनादितात्पर्यद्योतनार्थं तात्पर्यपदोपादानम्। अनादितात्पर्यविषयीभूता हि लक्षणा निरूढलक्षणा॥ तात्पर्यस्य तत्रानादितां स्पष्टयितुमेव च "यथा वेदविच्छास्त्रविदित्यादौ वेदादिशब्दानाम्" इति दृष्टान्तोपादानं व्यासार्याणाम्। शब्दपराणां शब्दानां शब्दप्रतिपाद्यत्वाविशिष्टार्थेऽनादितात्पर्यान्निरूढलक्षणैव प्रकृते वचःपदस्यार्थे। स्पष्टं चेदं "तदधीते तद्वेद"इति सूत्रे महाभाष्ये वेदं वेदेत्यादौ वेदादिशब्दानां वेदार्थपरत्वम्। यथा-"तदधीते तद्वेद किमर्थमुभावप्यर्थौ निर्दिश्येते। न योधीते वेत्त्यसौ। यस्तु वेत्त्यधीतेप्यसौ। नतयोरावश्यकः समावेशः। भवति हि कश्चित्संपाठं पठति न वेत्ति। तथा कश्चिद्वेत्ति न च संपाठं पठति"इति॥ यद्यप्यत्र"अर्थावबोधो वेदनमभिप्रेतं न तु स्वरूपमात्रवेदनम्" इति कैय्यटे वेत्तेरेवार्थावबोधलाक्षणिकत्वमिति प्रतीयते॥ तथापि वेदस्वरूपं काव्याद्यर्थं च यो वेत्ति तस्मिन्वेदं

वेत्तीति प्रयोगवारणाय वेदादिपदसमभिव्याहारे वेत्तेर्वेदादिप्रतिपाद्यत्वविशिष्टार्थावबोधत्वावच्छिन्नलाक्षणिकताश्रयणीयेति गौरवम् । अतो वेदादिपदानामेव वेदप्रतिपाद्यार्थत्वावच्छिन्नलाक्षणिकताश्रयणं युक्तम् । लक्ष्यतावच्छेदकलाघवात् । अत उपदर्शितस्य महाभाष्यस्य वेदादिपदलाक्षणिकतापरतया लापनमेव युक्तम् । कैय्यटस्यापि वेदपदस्य तदर्थपरत्वे स्वीक्रियमाणे वेदावबोधरूपमेव वेदनं पर्यवस्यति न तु वेदस्वरूपमात्रवेदनमित्यर्थपरतया योजनं शक्यमिति व्यासार्याणामाशयः ॥

सुधाशब्दस्य तु पुनरत्र साम्प्रतिक्येव लक्षणार्थ इति दूषणावहैव गौणी वृत्तिः । निरूढाया लक्षणाया ह्यभिधानापरपर्यायमुख्यवृत्तितुल्यत्वमेव सम्मतं तान्त्रिकाणाम् । यथोक्तं तन्त्रवार्तिके—

"निरूढलक्षणाः काश्चित्सामर्थ्यादभिधानवत् ।
क्रियन्ते साम्प्रतं काश्चित्काश्चिन्नैवाप्रयोगतः ॥" इति ।

अत एव हि षष्ठीसमासपक्षे सुधाशब्दलक्षणैवोद्भाविता न तु निषादस्थपत्यधिकरणप्रसिद्धा तत्पुरुषपूर्वपदीभूतवचःपदस्य सम्बन्धिलक्षणापि । तस्या आनुशासनिकतया निरूढलक्षणारूपत्वादित्यवधेयम् ॥ तत्सिद्धमाचार्यैस्सुष्ठूक्तं-"रूपकप्रकरणात्सुधाशब्दलक्षणाभयाच्च" इति हेतुद्वयेन षष्ठीसमासखण्डनमुपमितसमासादरणं चेतीति दिक् ॥

अथैवमप्यत्र वचस्सुधापदे रूपकालङ्काराभिधानमाचार्याणां न युज्यते । पूर्वाचार्यसुरक्षितत्वादिविशेषणद्वयस्य प्रसिद्धसुधायामसम्भवेन रूपकप्रतिकूलत्वात्–इतिचेदत्र काश्चित्-"पूर्वाचार्यैत्यादिविशेषणं नात्र रूपकप्रतिकूलम् । प्रत्युत

" अयमास्ते विना शम्भुस्तार्त्तीयीकं विलोचनम् ॥ "

इत्यदाविव प्रसिद्धशम्भुव्यावृत्तेरत्रापि प्रसिद्धामृतव्यावृत्तेर्भानानुकूलतयाऽनुकूलमेव" इत्याह॥तदसत्॥प्रसिद्धामृतव्यतिरेकभानविवक्षाया इह व्यासार्याभिमतत्वे "आनीतामिति सुधापक्षे निजाक्षरैः गायत्र्यवयवभूतैरमृताक्षरैरिति यावत् । अतो ममाक्षरैरित्यनुक्तिः" "सुधासमाध्यानुगुण्याय ममाक्षरैरित्युक्तिः। तदा गायत्र्यवयवभूतामृताक्षरैरित्यर्थ इत्यादि श्रुतप्रकाशिका श्रुतदीपिकागततदुक्त्यसङ्गतिप्रसङ्गात् । ममाक्षरैरित्युक्तावपि प्रसिद्धामृतव्यतिरेकस्यैव परिपोषणसम्भवेन तदनुक्तिकथनप्रयासासङ्गतेः–इति चेदत्रोच्यते– पूर्वाचार्याः सुरा इव पूर्वाचार्यसुरास्तैः क्षितां सञ्जातक्षेमामित्यर्थः । क्षशब्दस्य क्षेमपर्यायतया "क्षस्संरोधे विरोधे च क्षेमदुःस्थानयोश्च ना" इत्येकाक्षरकोशप्रसिद्धेरित्याश्रयणात्प्रसिद्धेसुधासाधारण्यमुपनिषद्दुग्धेत्यादिविशेषणवदस्यापि विशेषणस्य ॥

यद्वा–शेषबलादेवास्य सुधासाधारण्यमुत्तरविशेषणस्येव बोध्यम् ॥ तथाहि. पूर्वाचार्यो हि भगवान् । तेन मोहिन्यवतारधारिणा सुष्ठु रक्षितां सुपात्रेषु विनियोगेन पालितामिति ।

तत्र पूर्वश्चासावाचार्यश्चेति विग्रहे पूर्वत्वमसङ्कोचात्सर्वपूर्वत्वे पर्यवस्यतीति प्रथमगुरुर्भगवानित्यर्थः । पूर्वेषामाचार्य इति विग्रहेपि स एवार्थः । अत्र च-

"कर्माविद्यादिचक्रे प्रतिपुरुषमिहानादिचित्रप्रवाहे
तत्तत्काले विपत्तिर्भवति हि विविधा सर्वसिद्धान्तसिद्धा ॥
तल्लब्धस्वावकाशप्रथमगुरुकृपागृह्यमाणः कदाचि-
न्मुक्तैश्वर्यान्तसम्पन्निधिरपि भविता कश्चिदित्थं विपश्चित् ॥"

"कमप्याद्यं गुरुम्" इत्याचार्यसूक्त्यादिकं क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः""स च पूर्वेषामपि गुरुः कालेनानवच्छेदात्" इति हैरण्यगर्भसूत्रादिकं चानुसन्धेयं प्रमाणजातम् ।

एवं बहुमतिव्याघातदूरास्थितामित्यस्यापि श्लेषेणैव सुधायां समन्वयो बोध्यः । तथाहि ॥ बह्व्यो मतयो येषां ते असात्त्विकस्वभावा दैत्याः । देवा हि सात्त्विका एकमतयः । यथोक्तं भगवता-

"व्यवसायात्मिका बुद्धिरेकेह कुरुनन्दन ॥
बहुशाखा ह्यनन्ताश्च बुद्धयो व्यवसायिनाम् ॥" इति ।

अथ वा-बहुमतयोतिचञ्चलबुद्धिवृत्तयः क्षिप्तमूढविक्षिप्तैकाग्रवृत्तिषु क्षिप्तवृत्तिस्वभावा दैत्याः । यथोक्तं हैरण्यगर्भैः-

"रजसाऽत्यन्तं क्षिप्तं चलं दैत्यानां, तमसा निद्रावृत्तिमन्मूढं रक्षःपिशाचानां, क्षिप्ताद्विशिष्टं विक्षिप्तं देवादीनाम् ।" इति ।

बहुमतीनां दैत्यानां व्याघातस्तच्चिकीर्षितप्रसह्याहरणभक्षण-

व्याकुलीकरणादिरूपस्तस्य दूरे स्थितामगोचराम्। तथा च भागवते—

"अमृताऽऽपूर्णकलशं विभ्रद्वलयभूषितः।
स वै भगवतस्साक्षाद्विष्णोरंशांशसंभवः॥
धन्वन्तरिरिति ख्यात आयुर्वेदधृगिज्यभाक्।
तमालोक्यासुराः सर्वे कलशं चामृताभृतम्॥
लिप्सन्तः सर्ववस्तूनि कलशं तरसाऽहरन्॥" इत्यारभ्य
दैत्यान् गृहीतकलशो वञ्चयन्नुपसञ्चरैः।
दूरस्थान्पाययामास जरामृत्युहरां सुधाम्॥"

इत्यन्तोदितं प्रमाणजातमिहानुसन्धेयम्। एवं निजपदस्य स्वपदवत्स्वसमभिव्याहृतक्रियाकारकवाचकतया सुधापक्षे सुधापरत्वेन सुधासम्बन्धिभिर्गायत्र्यक्षरैः सहेत्यर्थः॥

ननु स्वनिजादिपदानां स्वसमभिव्याहृतक्रियाकारकवाचिताया एव शक्तिवादादौ व्यवस्थापितत्वादुच्चारयितृपरता दुर्लभा॥ न च तथापि वचःपक्षे निजपदमात्मीयपरं सद्गादरायणसूत्रपरम्। तथा चेह वक्ष्यमाणस्य सूत्रार्थस्य सूत्राक्षरैकलभ्यत्वं परोदीरितभाष्याणामुत्सूत्राक्षरत्वं च सिध्यतीति न काचिदनुपपत्तिरिति वाच्यम्॥ एवमपि सुधासमाध्यानुगुण्याय ममाक्षरैरित्यनुक्तिरित्यादिटीकाग्रन्थेन वचःपक्षे ममाक्षैरित्यर्थस्यैवविवक्षितत्वावगमात्तदसङ्गतेः—इति चेत्॥ननिजपदस्येह समभिव्याहृतपिबतिक्रियाकारकभूतभौमसुमन-

स्संबन्धिपरतासंभवेन भौमसुमनस्सम्बन्धित्वेन च वक्तुर्भाष्यकृत एव भगवतो विवक्षितत्वाभिप्रायेणैवोपदर्शितटीकोक्तिसङ्गतेः । आत्मीयत्वेन भाष्यकृतो निर्देशाच्चाप्ततमत्वं व्यञ्जितम् । सुमनःपदेन हि "सारासारविवेकज्ञाः गरीयांसो विमत्सराः । प्रमाणतन्त्राः सन्तीति" इत्याद्युक्ता विवक्षिता इति स्पष्टं टीकायां।तादृशानां चात्मीयस्तादृश एव भवतीति॥

तत्राक्षरेषु सुधासम्बन्धित्वं सुधालग्नत्वमेव वस्तुतस्तेषामक्षराणां चतुर्णां प्रथमं त्रिष्टुब्जगतीछन्दसोरवयवत्वात्पश्चाच्च गायत्र्यवयवभूतत्वात् । एवं निजाक्षरैरिति वचःपक्षे करणे तृतीया । सुधापक्षे तु सहार्थयोगे तृतीया न तु करणे, गायत्र्या जगतीत्रिष्टुप्सम्बन्ध्यक्षरचतुष्कस्य सोमलग्नस्य सोमस्य च सहैव नीततायास्ततः परमेव तादृशाक्षरचतुष्केण योगात्प्रथमं चतुरक्षराया अपि गायत्र्या अष्टाक्षरत्वसंपत्तेश्चाम्नानात् । तथा च तैत्तिरीयसंहितायाः षष्ठे काण्डे प्रथमप्रपाठकस्य पष्ठेनुवाके—"कद्रूश्च वै सुपर्णी चात्मरूपयोरस्पर्धेतां सा कद्रूस्सुपर्णीमजयत्साब्रवीत्तृतीयस्यामितो दिवि सोमस्त माहर तेनात्मानं निष्क्रीणीष्वेतीयं वै कद्रूरसौ सुपर्णी छन्दाँसि सौपर्णेयास्साब्रवीदस्मै वै पितरौ पुत्रान्बिभ्रतस्तृतीयस्यामितो दिवि सोमस्तमाहर तेनात्मानं निष्क्रीणेष्वेति मा कद्रूरवोचदिति जगत्युदपतच्चतुर्दशाक्षरा सती साऽप्राप्य न्यवर्तत तस्यै द्वे अक्षरे अमीयेतां सा पशुभिश्च दीक्षया

चागच्छत्तस्माज्जगती छन्दसां पशव्यतमा तस्मात्पशुमन्तं दीक्षोपनमति त्रिष्टुबुदपतत्त्रयोदशाक्षरा सती साऽप्राप्य न्यवर्तत तस्ये द्वे अक्षरे अमीयेतां सा दक्षिणाभिश्च तपसा चागच्छत्तस्मात्त्रिष्टुभो लोके माध्यन्दिने सवने दक्षिणा नीयन्त एतत्खलु वा व तप इत्याहुर्यस्त्वं ददातीति गायत्र्युदपतच्चतुरक्षरा सत्यजया ज्योतिषा तमस्या अजाभ्यरुन्धतातदजाया अजात्वं सा सोमं चाहरच्चत्वारि चाक्षराणि साष्टाक्षरा समपद्यत ॥" इति ॥

अयमत्र भाष्याभिमतोर्थसङ्ग्रहः-कद्रूस्सुपर्णी चोभे सपत्न्यौ पराजये दासीत्वमभ्युपेत्य ममैव सौन्दर्यं ममैवेत्यस्पर्धेताम्। तत्र मध्यस्थाः कद्रूजयमूचिरे। सा च कद्रूः सुपर्णीं दासीत्वेन परिगृह्य तन्मोचनोपायं स्वयमेवोपादिदेश। इतोऽस्माल्लोकादारभ्य गणनायां तृतीया द्यौः स्वर्गलोकः। तस्मिन् सोमो वर्तते । महर्जनस्तपस्सत्यमित्येतेपि लोका द्युशब्दाभिधेयाः। तस्मादितस्तृतीयस्यामिति विशेष्यते। तस्मिन् सोमे आहृत्य दत्ते सति त्वां मुञ्चामीति । इयं वै पृथिवी कद्रूः। अत एव सा स्वयमाहर्तुं न शक्नोति। असा सुपर्णी तु द्युलोकरूपा उत्पतनसमर्थानां गायत्र्यादिरूपाणामपत्यानां सद्भावाच्च शक्नोति । अथ सा सुपर्णी स्वपुत्राणां गायत्र्यादीनामग्रे स्ववृत्तान्तं स्पष्टीकुर्वती एवमाह । पुत्रानस्मै एतादृशोपद्रवपरित्राणाय मातापितरौ

पुष्यतः । मां च कद्रूस्तृतीयस्यामित्यादिकमवोचत् । हे गायत्र्यादिपुत्रा एतत्प्रतिपद्य यदुचितं तत्कुरुध्वम् । गायत्र्यादीनां चैच्छिकशरीरधारित्वात्पुत्रत्वमविरुद्धम् । तत्र प्रथमं प्रौढत्वाच्चतुर्दशाक्षरा जगती प्रवृत्ता द्युलोकं गत्वा स्वानभ्राजादिभिः सोमरक्षकैः सह युध्वा सोममप्राप्याग्नीषोमीयसवनीयानूबन्धाख्यपशूनिष्टिसाध्यदीक्षां च गृहीत्वा स्वकीयाक्षरद्वये स्वानादिभिर्गृहीते सति पराजित्य समागता । यस्माज्जगती पशूनानयत्तस्मात्सैवात्यन्तपशुप्रदा । यतः पशुभिः सह दीक्षाऽऽनीता । ततः पश्वधिकस्वाधीनसम्पत्तौ सत्यां दीक्षायां प्रवर्तते । एवं तत्त्रिष्टुप् त्रयोदशाक्षरा गत्वा पराजिताऽक्षरद्वयहीना प्रतिनिवृत्ता दक्षिणाभिस्तपसा च सह । ततो गायत्र्यजाख्यया दीप्त्या सह द्युलोकं प्रवृत्ता । सा च दीप्तिस्तं सोममभितो रुरोध । तस्माद्रोधनपर्यायक्षेपणार्थादजधातोरजेति नाम निष्पन्नम् । ततः सा गायत्री सोममप्याहरत् । तत्सम्बद्धमक्षरचतुष्टयमप्याहरत् । अत एव सा गायत्र्यष्टाक्षरा समपद्यतेति ॥

यद्यप्यत्र सोमस्यैव लतात्मनो गायत्र्या समाहरणमाम्नातं न सुधायाः । सोमपदश्रवणात्सोमक्रयणप्रकरणाच्च । तथापि

"ब्रह्मादयोऽसृजन्पूर्वममृतं सोमसंज्ञितम् ।
जरामृत्युविनाशाय विधानं तस्य वक्ष्यते ॥"

इत्यादिना सुश्रुतादौ वैद्यकेऽमृतस्यैव सोमलतारूपतयाऽवतारोक्तेः महाभारतेपि सौपर्णे आदिपर्वणि सोमामृतपदयोर्बहुधापर्यायतया प्रयोगेणामृतस्य सर्वच्छन्दोभिमानिगरुडानीतत्वोपदेशात्सोमामृतयोस्तादात्म्यावगमात्सुधायां निजाक्षरानीतत्वं सङ्गतमेव । तथा चादिपर्वणि त्रिंशेऽध्याये—

"महावीर्यबलः पक्षी हर्तुं सोममिहोद्यतः ॥" इत्यादि तत्रैव चतुस्त्रिंशे चाध्याये—

"एवं तदमृतं तेन हृतमाहृतमेव च ।
द्विजिह्वाश्च कृताः सर्पा गरुडेन महात्मना ॥"

इतीति ध्येयम् ॥

यद्यपि सुमनसो भौमा इत्यत्र सुमनसो विद्वांस एव सुमनसः सुरा इति श्लिष्टरूपके भौमविशेषणेन व्यतिरेको गर्भित इति प्रतीयते ॥ तथाप्युक्तरीत्या सुधारूपकं व्यतिरेकागर्भमेव ॥ यद्वा—सुमनस इत्यत्र नैव रूपकं विवक्षितम् । अत एव "सुमनसः सारासारविवेकादिलक्षणा भौमा अधीतसाङ्गवेदाः श्रुतकर्ममीमांसा भूलोकवासिनो देशकालान्तरेषु वृत्त्यादिसाफल्यमिति भावः सुमनसः सारासारविवेकज्ञा इत्याद्युक्ताः । अनेनासदपरिग्रहो न दोषायेत्युक्तं भवति । देवादीनां वृत्तिकारग्रन्थादिभिः सुगमत्वाद्भौमा इत्युक्तम्" इति श्रुतदीपिकाश्रुतप्रकाशिकयोर्विषयभूतविद्वद्व्यावर्तकतयैव भौम

विशेणविवरणं संगच्छते । व्यतिरेकगर्भरूपके तु विवक्षित
विषयिव्यावर्तकतयैव व्याख्येयं स्यादिति ॥

यद्यपि सुमनस इत्यत्र न श्लिष्टरूपकं किन्तु व्यस्तरूप
कम् । तदर्थं मनुष्यत्वत्रैवर्णिकत्वादिप्रतिपत्तिरार्थिकी । त
था च भूलोकवासित्रैवर्णिकरूपाः सुरा इत्येवार्थो भाष्यकृता
मभिमतः वचस्सुधामित्युपक्रमानुगुण्यात्सुमनःपदरूढ्यपरि
त्यागाच्चेति व्याकर्तुमुचितं व्यासार्यैः ॥ तथापि सुमनःपदे
योगार्थतया विवक्षितेन सारासारविवेकज्ञत्वादिरूपेण लोको
त्तरविदुषां विवक्षायां तदात्मीयत्वेन च निजपदेन भगवतो भा
ष्यकारस्य विवक्षायां च स्वारस्यातिशयं मन्वानैष्टीकाकारै
सुमनःपदे रूढिं रूपकं चोपेक्ष्य विवृतम् । श्लिष्टरूपके त्वे
कपदोपस्थापितयोरर्थयोरेकस्य यत्रान्वयोऽन्यस्यापि तत्रा
न्वयस्य व्युत्पत्तिसिद्धत्वान्निजपदस्य विषयभूतविद्वत्सम्ब
न्धिपरत्वे विषयिभूतसुरसम्बन्धिपरत्वमप्यावश्यकं संभाव्ये
त । तथा च सत्यनन्वय इति । अत एव सुमनःपदे विद्व
त्सामान्ययोगरूढिरपि न विवक्ष्यते । तथा सति तत्र योगेन
शास्त्राभ्यासंस्कृतमनस्कत्वरूपसाधारणाकारलाभेप्यसाध
रणाकारालाभात् । सुमनःपदे केवलयोगविवक्षायां तु सुपदे
शोभनत्वस्यान्यासाधारणस्यैवोद्दिष्टस्य विवक्षणसंभवात् ॥

" सारासारविवेकज्ञा गरीयांसो विमत्सराः ॥
प्रमाणतन्त्राः सन्तीति कृतो वेदार्थसंग्रहः ॥ "

Location 646734

Academy of Sanskrit Research
MELKOTE - 571 431

*Acc. No.*_____

Call No. _____

Plese return this publication on or before the last DUE DATE stamped below to avoid incurring over-due charges.

Due Date	Return Date	Due Date	Return Date

Location..... R.....

